No. २१६९

Title वासिष्ठ लंग्रहस्य चान्द्रिका प्रकाश्य उत्पत्ति प्रकरणं

Author श्री आत्म पुजः

Extent ९४ Age ×

Subject वेदान्त शास्त्रं

२१८८
F = ९५

...संग्रहस्य वासिष्ठचन्द्रिकासहितस्यो
त्पत्तिप्रकरणम्

२१६८

६४ पत्र

ग्रं २२६९

पत्रे ९४

उत्पत्तिप्रकरण॥३

॥ ॥श्रीगणेशाय नमः॥ उत्पत्त्याख्ये प्रकरणे॥ नवाख्यानं विराजते आद्यमाकाशजाख्यानं लीलाख्यानमतः परं कर्कट्याप्रे
दं वानां बहुतिमेंद्रस्य च क्रमात॥ आख्यानान्यथ चित्तस्य च षष्ठं बालस्य सप्तमं॥२॥ ततः मांबरिकाख्यानं ततो लवणभूभृ
तः॥ आख्यानं सप्तम्नमीनां वर्णनं यत्र शोभनं॥३॥ तेष्वाख्यानेषु पूर्वं तु संक्षेपाद्बोधमुच्यते॥ पूर्वप्रकरणवृत्तमनू

वसिष्ठ उवाच॥ मुमुक्षुव्यवहारोयं मया ते परिकीर्तितः॥ अथेयं जागती श्रीमदुत्पत्तिः परीकीर्त्यते॥

॥१॥

द्योतयन्प्रकरणतात्पर्यमाह॥ मुमुक्षुव्यवहार इति॥ आत्मा वा अरे द्रष्टव्य इत्यादिश्रुत्युक्तः शमादीतिकर्तव्यतो
पेतो मनननिदिध्यासनांगकः श्रवणलक्षणो व्यवहारो मुमुक्षुव्यवहार इत्युच्यते॥ जागती जगत्संबंधिनी गग
नाद्यंशसर्वनगरोत्पत्तिरिव अधिष्ठानादज्ञातब्रह्मणो जगदुत्पत्तिरभिधीयत इत्यर्थः॥ ॥ ॥

मुमुक्षुणा इष्टव्ये ब्रह्मात्मतत्त्वे पूर्वं प्रतिपादिते प्रत्यक्षादिप्रमाणप्रकाशितप्रपंचसत्यताशंकया तस्यापरिपूर्णताशंकापातत्वतिहाराय प्रपंचस्यक
ल्पितस्य परमात्मव्यतिरेकेणासत्वं प्रतिपादयितुं तस्मात्सृष्टिः पश्चाद्वर्णनीयेत्यभिप्रेत्य जीवस्वरूपे वादिविप्रतिपत्तेः स्वाभिमतजीवस्वरूपं कथनपू
र्वकं तस्य ब्रह्मैक्यमाह ॥ अनुभूतेरित्यादिना स एव संविदित्यनेन अथवा ऐकात्म्यं विज्ञातुमिच्छतो मुमुक्षोस्तदेव पूर्वं प्रतिपादनीयं तच्छेषतया
सृष्टिः पश्चाद्वर्णनीयेत्यभिप्रेत्य बुद्ध्याद्याप्राग्एव तत साक्षितया प्रकाशमानेनमास्तिमितमात्मेति प्रसिद्धेनापरोक्षचैतन्यात्मकेन जीवेन तद्वि
द्यस्य परोक्षस्य ब्रह्मण एकत्वं न संभवतीत्याशंक्य तस्य अपरोक्षचैतन्यात्मतां दर्शयन् प्रत्यगैक्यमाह । अनुभूतेरिति अथवा मुमुक्षुजिज्ञासि
तजीवपरमात्मैक्यमनभिधाय जिज्ञासितजगदुत्पत्तिपरिकीर्तनं प्रतिज्ञातमुपपन्नेत्याशंक्याह ॥ अनुभूतेरिति इह व्यवहारे मया अनुभूतिवेदन
प्रतिपत्तिशब्दैरभिहिता परोक्षचैतन्यस्य यथाभिधं अभिधा मतेति क्रमात् अनुभूतिः प्रत्यक्षं वेदनं प्रतिपत्तिः । प्रत्यक्षमिति । प्रत्यक्षं नाम प्रत्येवं

॥ ॥ अनुभूतेर्वेदनस्य प्रतिपत्तेर्यथाभिधं ॥ प्रत्यक्षमिति नामेहकृतं जीवः स एव नः ॥ २ ॥

वादिभिः स्वाभिमतविशेषणप्रक्षेपपूर्वकं कृतं स एव नोऽस्माकमौपनिषदानां जीवः तथा च महद्भिरुक्तं । अनुभूतिर्वेदनं च प्रतिपत्तिरितीरि
त्वैतन्यमपरोक्षं यज्जीव इह कथ्यत इति । एतेन वादिभिरन्यथा तत्कल्पितजीवस्वरूपमात्मा ब्रह्मेति पक्षे त्वयं श्लोक एवं व्याख्येयः अनुभूतिशब्दे
न ब्रह्मोऽस्य तेर्वेदनप्रतिपत्तिभ्यां तदेव विशिष्यते । वेदनमिति ब्रह्मापरोक्षज्ञानमुच्यते ॥ प्रतिपत्तिरिति । लौकिकं प्रत्यक्षं महावाक्यजनितां तच्छ
रणाद्दृष्ट्या तद्वं ब्रह्मैवापरोक्षज्ञानशब्दनिगद्यं भवति । चक्षुरादिजनितां तच्छरणादृश्यात्मत्वं तदेव लौकिकप्रत्यक्षमुच्यते । वेदनप्रतिपत्त्यात्मिकाया अ
नुभूतेर्ब्रह्मणो यथाभिधं प्रत्यक्षपर्यायाणामनतिक्रम्येहमोक्षशास्त्रे प्रत्यक्षमितिनामकृतं पठितमित्यर्थः अपरोक्षादपरोक्षं चक्षुनेत्रमिति
हि प्रत्यक्षाऽपर्यायाणां प्रतिपादकः स्मृतिः स एव प्रत्यक्षनामकं ब्रह्मैव नोऽस्माकमौपनिषदानां जीवा जीवपदलक्ष्यं प्रति निर्दिश्यमाना पेक्ष्यालिं

४

वा·टी
२

॥स एवं विदिति। मणी वोपरोक्त्यैतन्यात्मा संविदेव ब्रह्मैव न तु मोक्षं कामस्य स एव संविदिति ब्रह्मैकत्वे प्रतिपादितेपि न मुक्तिः संभव
ति। परिपूर्णात्मनावस्थानं हि मुक्तिः ब्रह्मव्यतिरिक्तस्य प्रपंचस्य सत्वेन तदसंभवादित्याशंक्य सर्वस्य प्रपंचस्य ब्रह्मविवर्त्ततां दर्शयति। स पु
मानित्यादिना। चित्त्वगतचित्वेति विंवलक्षणो जीवः पुमानित्युच्यते। अहंतया प्रतीयत इत्यहंताप्रत्ययोहंकारः स इति तद्धेतुत्वेन संविद्रूपः प
मात्मा परामृष्यते। स संविद्रूपः परमात्माप्यविद्यया पूर्वं चिन्नोपाधिकः पुमान् भूत्वा पश्चादहंताप्रत्ययात्मको भवति॥ उपलक्षणमेतत्
बुद्ध्यात्मको मनआत्मकश्च भवतीत्यपि द्रष्टव्यं। स एव बाह्यपदार्थरूपेणापि विवर्त्तत इत्याह॥ सययेति॥ स यया संवित्या घटपटाद्या

स एव संवित्पुमानहंताप्रत्ययात्मकः॥ स ययोदेति संवित्या पदार्थ इति स्मृता॥३॥ स संकल्पविकल्पाद्यैः कृत
नानाक्रमोऽक्रमैः॥ जगतेयास्फुरत्ययं उरत्नतरंगादितपायथा॥४॥ ॥ ॥ ॥ ॥ ॥ ॥

कारयोदेति यत्संविद्रूपेण विवर्त्तत इत्यर्थः॥ सा संविद्घटपटादिलक्षणः पदार्थ इति स्मृता॥ सर्वोपि हि पदार्थमानो विलास एवे
ति हि शास्त्रमर्यादा॥३॥ क्रमर्थं स्पष्टयति॥ स संकल्पेति स परमात्मा संकल्पविकल्पौ भ्रमसंशयावाद्यौ येषामभिमानादीनां तैः
कृतनानाक्रमः कृतोनानाभूतोऽवस्थाक्रमो यस्य स तथा॥ एवं ह्यवस्थाक्रमो भवति॥ परिपूर्णसंविद्रूपः परमात्मा सृष्टिकाले
पूर्वं सामान्यतो हंसपत्यावस्थामाप्नोति॥ ततश्चिद्वावस्थामाप्नोति॥ ततोहंकारावस्थां ततो बुद्ध्यवस्थां ततो मनोवस्थामिति। अग्रे
वक्रमग्नहरक्तस्पष्टीभविष्यति॥४॥

राम
२
४८

ननु ब्रह्मेत्थं जगद्रूपया स्फुरति चेत्तर्हि जगत्कारणेन ब्रह्मणा तद्विपरीतस्य जीवस्यैक्यमनुपपन्नमित्याशंक्याह प्रागिति प्रत्यक्प
माणात्मकप्रत्यगभिन्नज्ञानप्रत्यक्षाभिधं ब्रह्म अथवा साक्षादेव प्रत्यक्षाभिधं ब्रह्म क्रियां कुर्वद्विकारकमिति न्यायात्॥ सृष्टेः प्राव
क्रियाभावादकारणमेव सत्। अथवा कारणत्वस्य मिथ्यात्वादकारणमेव सत्॥ सर्गादौ वा स्वसर्गलीलया मायामय्या सर्गार्थं स्फुरण
लीलया स्फुरित्वात्मनि संस्काररूपेण विद्यमानस्य जगतः स्वयं कारणम्भूतं॥ अथवा सर्गादौ सृष्टिपालनादावकारणं वास्तवसहका
रिकारणरहितं सृष्टेः प्राक् स्वसर्गलीलया स्फुरित्वा मायया कारणनिर्वाहिका आत्मनि वर्त्तमानस्य जगतः कारणम्भूतं प्रपंचरूपेण विव
र्त्तमानमाद्योविद्यानत्वं हि ब्रह्मणः कारणत्वं। ब्रह्मण एव कारणत्वं मायायाद्वारत्वं इति स्ववर्त्तुपर्धितसात्मानं स्वयमित्युक्तं प्रपंचयति

प्रागकारणमेवास्म सर्गादौ सर्गलीलया स्फुरित्वाकारणं भूतं प्रत्यक्तं स्वयमात्मनि ॥ ५ ॥ रूपालोकमनस्कारपदार्थ ॥
व्याकुलं जगत् ॥ विद्यते वेदनस्यांतर्वातांतः स्पंदनं यथा ॥ ६ ॥ ॥ ॥ श्रीगोपालायनमः॥ ॥ ॥

५ रूपेति अथवा ब्रह्मणो जगत्त्वस्यान्निमभिधाय तत्रैव स्थितिमाह रूपेति। मनस्कारो मनस आभोगो मनो विस्तारः चित्ताभोगो म
नस्कार इत्यमरः॥ रूपं चालोकश्च मनस्कारश्चान्ये पदार्थाश्च रूपालोकमनस्कारपदार्थास्तैर्व्याकुलं व्यामिश्रं॥ अथवा रूपस्यालोकः
प्रकाशो रूपदर्शनं। अनेन जागरणं लक्ष्यते मनस्कारशब्देन मनो विस्तारात्मकः स्वप्नो विवक्षितः॥ रूपालोकमनस्कारयोर्ज्जागरण
स्वप्नयोर्ये पदार्थास्तैर्व्याकुलं॥ जगद्वेदनस्य ब्रह्मलक्षणस्यांतः संस्काररूपेण स्थूलरूपेण वा तत् वर्त्तते ब्रह्मणि तादात्म्येन जगद्वर्त्तत इ
तिज्ञापनाय दृष्टांतमाह। वातांतरिति ६

बा·टी·
३

ननुब्रह्मजगदुपादानकारणंचेत्तर्हिघटोब्रह्मपटोब्रह्मेतितत्तादात्म्येनाप्रतीयेतजलमिवतरंगाद्यात्मनानचैतद्दृष्टम्।अतोनो
पादानंकिंतुनिमित्तमेवेत्यतआह॥सर्वात्मेति॥सर्वात्मकंवेदनंज्ञानरूपंब्रह्मयथायेनप्रकारेणयत्कार्यस्वरूपेणोदेतिविव
र्ततेतदात्मकंतत्कार्यस्वरूपंसत्भातिसद्घटःसन्पटइतिहितत्तादात्म्येनासद्रूपंब्रह्मप्रकाशते।तेनोक्तंब्रह्मणानुपादानकारण

सर्वात्मवेदनंशुद्धंयथोदेतितदात्मकं॥भातिप्रसूतदिक्कालबाह्यांतारूपदेहकं॥७॥ससर्वात्मायथायत्रसमु
द्भासमुपागतः॥तिष्ठत्यासुतथातत्रतद्रूपइवराजते॥८॥ ॥ ॥ ॥ ॥

त्कमपिप्रसूतदिक्कालबाह्यांतादेहरूपकं॥अंतरित्यर्थयेनांतरंवस्तुविवक्षितं।विप्रसूतस्वरूपदिक्कालयुक्तबाह्यांतराणां
रूपंस्वरूपमेवदेहोयस्यतत्तथा॥उक्तमर्थंविशदयति।ससर्वात्मेति॥यत्रदेशेयथायेनप्रकारेणयत्कार्यात्मनासमुद्भास
समुज्जृंभणमित्यर्थः॥८॥

एम
३

५०

प्रागकारणमेवेत्यादिनोक्तमर्थं विशदयति॥ अकारणकमिति। यातो मयाद्वारं विना ब्रह्मणि कारणत्वं न विद्यते। अतोऽकारणकमेव
वास्तवकारणरहितमेवेदं जगत्सृष्टेः प्राक् ब्रह्मकल्पमनभिव्यक्तनामरूपतया ब्रह्मस्वरूपमिवस्थितं। अधिष्ठानभूते ब्रह्मणि संस्का
रशेषं विलीनं जगत्ततो विभाव्यमानमेदं स्थितमित्यर्थः॥ सृष्टिकाले प्राप्ते जगतः प्रत्यक्षमेव प्रत्यक्षप्रमाणात्मकं ब्रह्मैव निर्मि
तमभवदिति। अक्षपादादिदर्शन इव नात्र परोक्षमसंविद्रूपं निर्मातृ अपरोक्षचैतन्यमेव जीव इति दर्शयितुं प्रत्यक्षप्रमाणमेव जीव इ

अकारणकमेवातो ब्रह्मकल्पमिदं स्थितं॥ प्रत्यक्षमेव निर्मातृ तस्यां शास्त्रनुमादयः॥९॥

त्युक्तं॥ तस्य संगादनुमानादिस्वरूपमाह॥ तस्येति। अथवापरोक्षचैतन्यं ब्रह्मेति दर्शयितुं प्रत्यक्षनामकं ब्रह्मेत्युक्तं॥ तस्य संगात्त्वनुमा
नादिस्वरूपमाह॥ तस्येति अनुमानादयः तस्य प्रत्यक्षप्रमाणस्यापरोक्षचैतन्यात्मकब्रह्मणो शाखांशाःपरिपूर्णात्रिमात्र
ब्रह्मांतःकरणप्रतिबिंबितं सत्प्रमातेत्युच्यते॥ तदेवेंद्रियलिंगादिजनितांतःकरणांशस्थं प्रमाणमित्यभिधीयत इति हि वेदांत
मर्यादा॥९॥

वा.टी.
४

५

सर्वं जगद्ब्रह्मकार्यमिति दर्शयता कारणब्रह्मव्यतिरेकेण कार्यं जगदसदेवेत्युक्तं वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति कारणाव्यतिरेकेण कार्यस्यासत्वप्रतिपादकश्रुतेः । इदानीं बंधतन्निवृत्त्योः कारणप्रदर्शनपूर्वकं तदेव बंधकारणभूतदृश्यजगदसत्वं प्रतिज्ञापूर्वकं प्रपंचयति सर्वं खल्विदं ब्रह्म तज्जलानिति श्रुतिमनुसरंस्त्वं बंधोयमित्यादिना जगत्त्वमहमित्यादिसर्गांता

बंधोयं दृश्यसद्भावो दृश्याभावेन बंधनं । न संभवति दृश्यं तु यथेदं शृणु कथ्यते । यदिदं दृश्यते सर्वं जगत्स्थावरजंगमं । तत्सुषुप्ताविव स्वप्नः कल्पांते प्रविनश्यति ॥ ११ ॥ ॥ ॥ ॥ श्रीगोपालाय नमः ॥ ॥

दृश्यसद्भाव उच्यत इति वर्तमानस्य दृश्यस्य सद्भावादयं साक्षादनुभूयमानः कर्तृत्वभोक्तृत्वादिलक्षणो बंधो भवति ननु दृश्याभावे बंधनं न भवतीति सत्यं स एव दृश्याभावेन संभवतीत्याह न संभवतीति तुशब्दः शंकाव्यावृत्त्यर्थः ॥ १० ॥ इदं दृश्यं यथा न संभवति तथा कथ्यते शृणु । यदिदमिति । विमतं दृश्यं असत् विनाशित्वात् स्वप्नवत् । विमतं विनाशि दृश्यत्वात् स्वप्नवदित्यर्थः ॥ ११ ॥

रम
४
५१

दृश्यवत् ब्रह्मणो विनाशित्वमाशंक्याह ॥ ततइति ॥ ततोनंतरं ततं व्याप्यं तेजस्तमश्च न किंतु स्तिमितं गंभीरं निश्चलं अपरिछेद्यं अनाख्यमभि
धानमिंद्रियागोचरत्वादनभिव्यक्तं किंचिदिदमित्थमिति निरूपणानर्हं सत्ब्रह्मावशिष्यते॥ सदेव सोम्येदमग्र आसीदितिश्रुतेः ॥१२
अनाख्यमित्युक्तं ब्रह्मादिनामकत्वात तस्येत्यत आह ॥ ऋतमिति ॥१३॥ एवं सर्वप्रपंचस्याज्ञानब्रह्मात्मनालयमभिधाय स्वरूपाद
प्रच्युतादेव तस्मात् सृष्टिकाले जगदुत्थानं नभसो गंधर्वनगरोत्थानमिव दर्शयत्रादौ समष्टिजीवहिरण्यगर्भोत्पत्तिमाह ॥ सतथेति
तथाभूत एव स्तिमितगंभीररूप एव स परमात्माकाशमिव स्वच्छे ज्ञाने स्वयमन्यइवोल्लसन्नन्य इवकं भ्रमाणोभाविनामकदर्थि

ततस्तिमितगंभीरं न तेजो न तमस्ततं ॥ अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते ॥१२॥ ऋतमात्मा परं ब्रह्म सत्यमित्यादिका बु
धैः ॥ कल्पिता व्यवहारार्थं तस्य संज्ञा महात्मनः ॥१३॥ स तथाभूत एवात्मा स्वयमन्य इवोल्लसन् ॥ जीवतामुपयातीव भाविनाम
कदर्थितां ॥१४॥

तां जीवीजीवादिनामभिः क्लेशितां कलुषीकृतां जीवतामुपयातीवाज्ञवशाद्व्यमन्यत्वादेमापिकत्वं द्योतयितुं इव शब्दः ॥ अत्रायं सृष्टिक्रमः॥
सृष्टेः प्राग् द्वितीयः परमात्मा सृष्टिकाले सर्वमनालिंगितविशेषदृश्यमात्रात्मना विवर्त्तते ततः समष्टिचित्तात्मना ततः समष्टि
जीवात्मना । ततोहंकारात्मना ततो बुद्ध्यात्मना ततो मनआत्मना ततस्तन्मात्रभूतभौतिकात्मना विवर्त्तत इति । तथा च वासि
ष्ठेभिहितं । पूर्वं चैत्यत्वकलनं ॥ ततश्चेत्याश्चेतनात् उदेति चित्वकलनं चितिशक्तित्वचेतनात् ॥ ततो जीवत्वकलनं चैत्यसंयोगचे
तनात् । ततोहंभावकलनं चेष्टोकपरतावशात् ॥ ततो बुद्धित्वकलनमहंतापरिणामता एतदेव मनस्त्वादिशब्दतन्मात्रकादिमदिति ॥१५

त्र्ययमेवक्रमःसाकल्येनानुकस्थलेपिद्रष्टव्यः ॥१५॥ दृश्यत्वचित्त्वद्वारासमष्टिजीवभावमापन्नस्यपरमात्मनोहंकारबुद्धि
द्वारासमष्टिमनोभावमाह ॥ ततइति ॥ स्वतानांकारणत्वात ॥ स्वतात्मासजीवशब्दार्थः। कलनाकुलतांकलनेनसंकल्पेना
कुलतांकुद्यतांगतः। सन्मनोभवेति। मनोविशेषणंमंथरीभवदिति ॥ मननात्संकल्पान्मंथरीभवत्स्थूलीभवत ॥१६॥

ततःसजीवशब्दार्थःकलनाकुलतांगतः ॥ मनोभवतिमहतात्मामननान्मंथरीभवेत ॥१५॥ मनःसंपद्यतेतेन
महतःपरमात्मनः। सुस्थिरादुस्थिराकारस्तरंगइववारिधेः ॥१६॥ तत्स्वयंस्वैरमेवाशुसंकल्पयतिनित्यशः।
तेनेयमिंद्रजालश्रीर्जागतीप्रवितन्यते ॥१७॥

उक्तंसंक्षिप्याह। मनइति। नामशब्दःकुत्सने। मनसःस्वभावंदर्शयंस्तेनसमष्टिमनसा ॥ शब्दादिपंचतन्मात्राकालादिप
चमहत्वब्रह्मांडादिभौतिकलक्षणांजगदिंद्रजालंप्रविस्तृतइत्याह। तदिति। तेनमनसाप्रवितन्यतेप्रकर्षणविस्तार्यते ॥१७

एवं समष्टिव्यष्टिजीवाहंकारबुद्धिमनोभावमापन्नात्परमात्मनउत्पन्नंजगदिंद्रजालं मिथ्याचेत्तर्हि तदभिन्नं॥ब्रह्मापिमिथ्यास्यात्॥ब्रह्मणः
सत्यत्वाज्जगतोपिसत्यतावास्यादित्यतआह॥यथेति॥कुटकशब्दार्थः॥कांचनात्पृथक्कत्वाहेमिदाहोनभवति॥नियमेनतदभावेत्रमा
वाद्रज्जुसर्पवत्॥सम्यग्दृष्टत्वरूपात्कांचनाद्भिन्नतयाऽनुपलभ्यमानत्वाच्च॥हेमतुकटकात्पृथक्कत्वाहंनभवतीति॥नातदभावेपिभावा
द्रज्जुवत्॥यथेतद्दृष्टांतद्वयंतद्वत्परमात्मनिजगच्छब्दार्थताभवति॥परंचजगच्छब्दादितिशेषः॥आरोपितस्यसत्तास्फूर्त्योरधिष्ठानापेक्ष
त्वादधिष्ठानस्यसत्तास्फूर्त्योरारोपितानपेक्षत्वात्॥ब्रह्मजगतोरेकंवैलक्षण्यमुपपन्नमेव॥१८॥ननुमनस्तत्छायापिशाचवदसत्वा

यथाकटकशब्दार्थःपृथक्त्वाहोंनकांचनात्॥नहेमकटकात्तद्वज्जगच्छब्दार्थतापरे॥१८॥असतीवसतीतापनद्येवलहरीचला
मनसेहेंद्रजालश्रीर्जागतीप्रवितन्यते॥१९॥अविद्यासंसृतिर्मोहोबंधोमायामलंतमः कल्पितानीतिनामानितस्याःसक
लवेदिभिः॥२०॥

ज्जगदिंद्रजालजनकत्वमनुपपन्नमितिचेत्तत्राह असतीवेति इहसंसारेतापनद्यामरीचिनद्याजललहरीचोर्मिरिवासतैवमनसासतीजागती
इंद्रजालश्रीःप्रवितन्यते॥१९॥जगतोनामकल्पनाविधानेनापिमिथ्यात्वंहेयत्वंचसाधयति अविद्येति यस्याजगदिंद्रजालश्रीयइतिनाम
निकल्पितानितस्याजगतीइंद्रजालश्रीरितिशब्देनासंबंधः॥वक्ष्यतिच॥अविद्यासंसृतिर्बंधोमनोमोहोमलंतमः॥इतिसंकल्पजालस्यनामान्ये
तानिसाराघवेति॥बंधोयदृश्यसद्भावाद्दृश्याभावेनबंधनं॥नसंभवतिदृश्यंचेद्यथेदंशृणुकथ्यतइति॥२०॥

वा॰टी॰
६

अनेनोक्तं प्रपंचयति। वंधस्येत्यादिना॥ दृश्यस्य द्वैतप्रपंचस्य अंगेति संबोधनं। बध्यते अनेनेति बंधः। उक्तं विशदयन् ज्ञानेन दृश्याभावे दृष्ट
त्वनिवृत्तेः कैवल्यमाह दृष्टेति। किं तद्दृश्यं यस्य बंधहेतुत्वमित्यत आह। जगदिति ननु नैयायिकादीनामिव दृश्यसद्भावेपि मोक्षः किं न स्या
दित्यत आह। यावदिति॥ यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति श्रुतेर्द्वैतिनो तथ्यदर्शिनो ज्ञानस्वरूपमत्यंतनिर्मलं परमा
र्थतः तदेवार्थस्वरूपेणार्थानिदर्शनतः स्थितमित्यादिविरुद्धपुराणवचनेभ्यश्च द्वैतिनां मुक्तिकमनीळीरायते॥ यावत् दृश्यं संभवति तावन्मो

वंधस्यैतावद्रूपत्वं कथ्यमानमिदं शृणु। ततः स्वरूपं मोक्षस्य ज्ञास्यसीदृसमानन। द्रष्टुर्दृश्यस्य सत्तांग बंध इत्यभि
धीयते। द्रष्टा दृश्यवशाद्बद्धो दृश्याभावे विमुच्यते॥ जगत्त्वमहमित्यादिसर्गात्मा दृश्यमुच्यते। यावदेतत्संभवति तावन्मो
क्षो न विद्यते। आनीलवल्लरीरूपं यथा पद्माक्षकोटरे। आस्ते कमलिनीबीजं तथांतर्दृष्टिर्दृश्यभूः॥ ॥ ॥ ॥

क्षो न दृश्यते चेत्तर्हि सुषुप्तिप्रलययोः सर्वदृश्यासंभवे सति मोक्षः किं न स्यात्। सुषुप्त्यादौ स्फुरत्या सर्वदृश्याभावप्रतिपादनात्॥ तत्र
ज्ञानसद्भावादिति चेन्न। तस्योत्थानदंष्ट्रोरगवदकिंचित्करत्वान्नवाभ्युपगम्य ततत्र मोक्ष इत्याशंक्याह। आनीलेति। कमलिनीबीजं
भाविकमलिन्याः पद्मिन्याबीजभूतमानीलवल्लरीरूपं आसमंतान्नीललतास्वरूपं पद्माक्षकोटरे पद्माक्षस्याभ्यंतरावकाशे संस्कार
रूपेण यथास्ते। तथांतर्दृष्टिर्दृश्यभूरास्ते प्रतिभासिकत्वाद्दृश्यस्य यथीरित्युक्तं॥ ॥ ॥

एम
६
५२

ननुसृष्टेरिहरूपंसंस्काररूपेणाऽऽलयादौवर्ततेचेत्तर्हिवाऽत्रसंस्काराविज्ञानादन्यातद्रूपंदृश्यस्यानियामकाकालादेर्वाकिंनस्यादित्याशंक्यदृष्टांतेनप
रिहरति ॥ यथेति ॥ वीजस्यांतःसंस्काररूपेणस्थितोंऽकुरोदेशकालतःप्रतिनियतदेशकालतोभासुरंप्रकांडशाखापत्रादिभिर्भासनशी
लंरूपंस्थूलंरूपंयथातनोतिएवंदृश्यधीरपिनियतदेशकालतःस्थूलरूपंतनोतिहियस्मात् ॥ ततोनतदेवजगदुत्पत्तिप्रसंगः ॥ अनीले
त्यादिनोक्तमुपसंहरति दृश्यस्येति ॥ यथाऽस्यपद्माकारादेर्घनंउदितोत्यन्ताचमत्कृतिराश्चर्यंतस्माभाविदृश्यस्यपरमसत्त्वावस्था
संस्काररमास्तमयोक्तितामसतीतस्योदरएवसदास्ति ॥ तथाचिन्मात्रशरीरिणांचिन्मात्रस्वरूपस्यपरमात्मदृश्यस्योदरेतःस्वभावभूतात्
स्वरूपाभिन्नाज्जगत्स्थितिरस्ति ॥ एवंतावज्जीवब्रह्मणोरेकत्वंतात्पर्येणसर्ववेदांतप्रतिपाद्यमभिधायविरुद्धधर्माक्रांततयातयोरैक्या

यथांकुरोंतर्बीजस्यसंस्थितोदेशकालतः तनोतिभासुरंदेहंतनोत्येवंहिदृश्यधीः ॥ इदमत्यन्तचमत्कृतिर्यथासदोदिता
स्मत्तमयोर्निर्वोदरे दृश्यस्यचिन्मात्रशरीरिणस्तथास्वभावभूतास्फुरदेषाजगत्स्थितिः ॥ वसिष्ठउवाच ॥ इदमाकाशजाख्या
नंशृणुश्रवणाभूषणं ॥ उत्पत्त्याख्यप्रकरणायेनराघवबुध्यसे ॥ ॥ ॥ ॥

संभवकानराशायचसर्वस्यविरुद्धज्ञानस्याकाशादिप्रपंचस्यचसकारणस्यतज्जलादिनाब्रह्मव्यतिरेकेणाऽसत्त्वमुक्त्वेदानींब्रह्मात्मै
क्यपरोक्षज्ञानस्यकर्मतत्फलात्मकसंसारनिवृत्तिलक्षणंफलंदर्शयितुंभवान्तृषिश्छउवाच ॥ तत्रमृत्युयमसंवादव्याजेनाविदुषिहिरण्य
गर्भेविद्याफलेदर्शितेसतिविद्वदंतरेऽपिन्यायसाम्यात्तद्दर्शितमेवभवतीत्यभिप्रेत्याकाशजाख्यानमवतारयति ॥ इदमिति ॥ अभूतार्थवा
क्येयंप्राणसंवादादिवत् ॥ भ्रांतदृष्ट्यैवतत्कर्मतत्फलात्मकःसंसारःतत्त्वदृष्ट्यातुनासीदस्तिभविष्यतीत्येतदर्थप्रतिपादकमुत्पत्त्याख्यप्रक
रणंयेनाकाशजाख्यानेनश्रुतेनबुध्यसे ॥ तदिदमाकाशजाख्यानंशृणु ॥ आकाशोवैनामनामरूपयोर्निर्वहितेतिश्रुतेः ॥ ॥ ॥

गो॰वा॰री

आकाशं ब्रह्म तस्माज्जायत इति आकाशजो ब्रह्मा॥ द्विजत्वादिकल्पनात् कथासौ द्व्यर्थः॥ ब्रह्मसदनरक्षणाय परितः प्रकारस्व
पेणास्थितोऽग्निरेनं स्मरं सुंदहति॥ अथवाकाशजेन द्विजेन वऊ कालं शुश्रूषितः॥ प्रीतोऽग्निरग्न्यागाराद्विनिर्गत्य स्वभक्तमारणोन्मुख

अस्तीहाकाशजो नाम द्विजः परमधार्मिकः॥ ध्यानैकनिष्ठः सततं प्रजानां च हिते रतः॥ स चिरंजीवति यदा तदा स्मरश्चिंतय
त्॥ सर्वाण्येव क्रमेणाहं भूतान्यपि किलात्ययः॥ एनमाकाशजं विप्रं न कस्मान्नं क्षयाम्यहं अत्र मे कुंठिता शक्तिः ख
ड्गधारा यथोपले॥ इति संचिंत्य तं हंतुमगच्छत्स्मरस्तदा॥ त्यजंतु ध्यानमुद्युक्तानस्वकर्माणि केचन॥ ततस्तत्सदनं यावत्स्म
रः प्रविशति स्वयं॥ तावद्देवं दहत्यग्निः कल्पांतदहनोपमः॥ अग्निज्वालामहामालां विदार्यं निर्गतो ह्यसौ॥ द्विजं दृष्ट्वा
समादातुं हस्तेनेच्छत्स यत्नतः॥ न वा शशाक स्मरो दुष्टमपि हस्तशतैर्द्विजं॥ बलवानप्यवष्टब्धुं संकल्पपुरुषं यथा॥ ॥

मेनं स्मरं सुंदहति॥ बलवानपि स्मरः पुरो दुष्टमपि हस्तशतैरप्यवष्टब्धुं ग्रहीतुं नाशकन्न शशाक॥ शक्लृ शक्तौ इति धातोर्लुङ्॥
अप्यर्थश्च वा शब्दो वष्टब्धुमित्यनेन संबध्यते॥ संकल्पपुरुषो मनोरथनिर्मितपुरुषाभासः॥ ॥

राम

त्वमेकोबला किंचिदपि सत्वं मारयितुं नाशक्त इत्यत्र हेतुमाह ॥ मारणीयस्येति ॥ तच्छद्बो मारणविषयः ॥ इति शद्बो हेतौ

॥ अथागत्य यमं मृत्युः पृष्टवान् संशयच्छिदं किमित्यहं न शक्नोमि भोक्तुमाकाशजं प्रभो ॥ यम उवाच ॥ मृत्यो न किंचित्त्वमेको मारयितुं बलात् मारणीयस्य कर्माणि तत्कर्तॄणीति निर्णेतरत । तस्मादेतस्य विप्रस्य मारणीयस्य यत्नतः कर्माणि वीक्षसे यात्वं साहाय्येनैनमत्स्यसि ततः स मृत्युर्बभ्राम तत्कर्माण्वेषणाहतः मंडलानि दिगंतांश्च सरांसि सरितो दिशः एवं स मंडलं भ्रांत्वा न कुत्रचित्स काणि चित् ताद्याकाशजकर्माणि लब्धवान्मृत्युरुद्धतः स मपृच्छद्धागत्य धर्मं सर्वार्थकोविदं परायणं हि प्रभवः संदेहेषु तु जीविनां । आकाशजस्य कर्माणि क्व स्थितानि वद प्रभो धर्मराजो यमः संचित्य सुचिरं प्रोक्तवानिदं आकाशजस्य कर्माणि मृत्यो संति न कानि चित् ॥ ॥ ॥ ॥

इति हेतुप्रकरणप्रकर्षादिसमाप्तिष्वित्यमरः तेषां कर्मणां मध्ये ऽन्यतमेन सहायेन ॥ सहाय्येनेति क्वचित्सहायभावेनेत्यर्थः ॥ विक्षदृष्टिमवलंब्याह ॥ आकाशजस्येति ॥ ॥ ॥ ॥

यो॰ टी॰
८

8

तत्रहेतुमाह॥ एवइति॥ केवलाद्वास्तवसहकारिकारणामहितात्खादेवपरमात्मनएवविंबात्प्रतिविंवतयाजातोहियस्मात्केवलात्परम
त्मनोजातत्वेपिहिरण्यगर्भस्यजीवस्यकथंकर्माभावस्तत्राह॥ आकाशादिति॥ वास्तवसहकारिकारणरहितात्परमात्मनोयोजातः
प्रतिविंवतयाभिव्यक्तःसोमलकर्मादिमलरहितंव्योमैववत्रहैवभवेत्॥ आकाशजःस्वकारणाद्व्यक्ततोनभिघतेवस्तवसहकारिका
रणरहितत्वेसतिजातत्वाज्जलचंद्रवदित्यर्थः॥ उक्तमर्थंसार्द्धश्लोकेनविशदयति॥ सहकारिणीति॥ अनुभूयतेप्रतिविंवादि
लोफलितमाह॥ एतदिति॥ यस्माद्विंबप्रतिविंवात्माद्यमाकाशजोव्यक्ततःपरमात्मत्वात्कर्मरहितस्तस्मादित्यर्थः॥ मृत्युवशगत्वानि

एषह्याकाशजोविप्रोजातःखादेवकेवलात्॥ आकाशादेवयोजातःसव्योमैवामलंभवेत्॥ सहकारिणिनोसंतिकारणान्
स्यकानिचित्॥ सहकारिकारणानामभावेयःप्रजायते॥ नासौस्वकारणाद्भिन्नोभवतीत्यनुभूयते॥ एतदाक्रमणोमृत्योनस्मा
न्मायत्नवानभव

रासेनहिरण्यगर्भेतदविनाभूतःसर्वोपिसांसारिकोधर्मोनिरस्तोवेदितव्यः॥ ननुएवसचक्षुभूतात्माभूतेभूतेव्यवस्थितः॥ ए
कधावहुधाचैवदृश्यतेजलचंद्रवदितिवचनाद्धिरण्यगर्भेणसर्वेषामपिजीवानांप्रतिविंवत्वेनवस्तुतोविंवभूतविद्रूपत्वे
कर्मतत्फलात्मकसंसाररहितत्वेचसमानेकिंविशेषमादायहिरण्यगर्भस्यैकस्यैवाकर्मत्वादिकमभिधीयतेइतिचेत्तत्राह॥ हि
रण्यगर्भस्यतत्वविन्त्वमेवविशेषमादायाकर्मित्वादिकमभिधीयते॥ तथाचश्रुतिस्तस्यतत्वविन्त्वमेवाह॥ सहायमीक्षांचक्रेयन्मद
न्यंनास्तिकस्मान्नुविभेमीति॥ ततएवास्यभयंवीयायेति॥ ॥

एम
८
५५

श्रुत्वैतदित्यादि ब्रह्मा किल पराकाशवपुरित्यंतः प्राक्तनो ग्रंथसंदर्भस्य स्पष्टार्थः । क्वचित्किंचिद्विविच्यते । प्रपितामह इत्यादि विशे
षणचतुष्टयं ब्रह्मणो महत्वख्यापनार्थं । विज्ञानात्मेति स्वरूपकथनार्थः । पितॄणां पितरः पितामहानां पिता प्रपितामहः सर्व
भूतानामादिकर्त्तेत्यर्थः । तथा चात्र पितामह इति क्वचित्तेष्योऽस्य त्रितो वैशिष्ट्यमाह स्वयंभूरिति स्वयमेव भवतीति स्व
यंभूः । अत एवाजः शुक्लशोणितं बीजादेर्न जायत इति एक एवाप्नोति व्याप्नोति सर्वकार्य्यमिति एकात्मा प्रधानात्मे

श्रुत्वैतद्विस्मितो मृत्युर्जगाम निजमंदिरं । श्रीराम उवाच । ब्रह्मैष कथितो देव त्वया मम प्रपितामहः । स्वयंभुरज एका
त्मा विज्ञानात्मेति मे मतिः ॥ वसिष्ठ उवाच । एवमेतन्महाबाहो ब्रह्मैष कथितस्तव । विवादमकरोन्मृत्युर्यमेनै
तत्कृते पुरा । मन्वंतरे सर्वभक्षो यदा मृत्युरदत्प्रजाः ॥ बलमत्याहृताक्रांतस्वारंभमकरोत्स्वयं । तदैवं धर्मराजेन यमे
नाथ अनुशासितः ॥ ब्रह्मा किल पराकाशवपुराक्रम्यते कथं । आकाशस्फुरदाकारः संकल्पपुरुषो यथा । पृथ्व्या
दिरहितो भाति स्वयंभूर्भासते तथा ॥

तिवा । विज्ञानं बुद्धिरात्मा स्वरूपं यस्य स तथा । ब्रह्म सर्वं तु पर इति वा । यमानुशासनमेव संक्षेपत आह । ब्रह्मा किलेति । किले
त्याक्रमणास्यासंभाव्यत्वे । पराकाशश्चिद्रूपमात्मा वपुः स्वरूपं यस्य स तथा । ननु ब्रह्म परब्रह्म शरीरश्चेत्कथं चतुर्मुखशरी
रत्वं तस्येत्याशंक्याह । आकाशस्फुरदिति ॥ प्रसिद्धाकाशे स्फुरन्नाकारः शिरःपाण्यादिमान्यस्य मनोरथकल्पितपुरुषस्य
स तथा प्रातिभासिकं ब्रह्मणः शरीरत्वं वस्तुतस्तु संकल्पपुरुषवन्नास्त्येवेत्यभिप्रायः । ।

ऊर्ध्वं विशदयानुपसंहरति। विश्राम इति। नजाविन्नवशास्वचिन्नवशात्‌ दृष्टु चिन्नवशादत्यर्थः॥ विश्रामतश्लाकानंतरं विराडवस्थ्यो
त्पन्नहिरण्यगर्भविषयो बृहद्वशिष्टगतश्लोको न्वेष्टव्यः॥ आतिवाहिक एवासौ देहस्तस्य स्वयंभुवः॥ नत्वाधिभौतिको राम दे
होऽजस्योपपद्यते इति ब्रह्मणो जीवत्वे जीवानां तस्य दाधिभौतिकदेहः कुतो न स्यादिति चोदयति। आतिवाहिक इति॥ अतिवाह्यते
तत्तद्देशं मार्गद्वयवर्त्मिदेवताभिरित्यातिवाहिकः॥ स्थूलदेहारंभकाकाशादिभूतसत्वासत्वाभ्यां जीवानां हिरण्यगर्भस्य च स्थूलदे

चिद्व्योम केवलं मनादिमनंतमध्यं ब्रह्मेति भाति निजचिन्नवशास्वयंभूः आकारवानिव पुमानिव वस्तुतस्तु वंध्यात्मजश्वत्
स्यैनुनास्तिदेहः॥ आतिवाहिक एवासौ देहस्तस्य स्वयंभुवः। नत्वाधिभौतिको राम देहोऽजस्योपपद्यते॥ श्रीरामउवाच। ॥
आतिवाहिक एकोऽस्ति देहोऽन्यस्याधिभौतिकः॥ सर्वासां भूतजातीनां ब्रह्मणोऽस्यैक एव किं॥ वशिष्ठउवाच॥ सर्वेषामेव दे
हौ द्वौ भूतानां कारणात्मनां। अजस्य कारणासत्वादेक एवातिवाहिकः। अन्येषां कारणं ब्रह्म प्रतिभासोत्थितं जगत्॥ अ
जस्य कारणं ब्रह्म तेनासावेकदेहवान्‌

ह सत्वासत्वे इत्युत्तरमाह। सर्वेषामिति कारणात्मनां कारणमुपादानलक्षणमात्मा स्वरूपं येषां तानि तथोक्तानि। अने
न देहद्वयारंभककारणसत्वं भूष्टिजीवानां सूचितं अजस्य कारणासत्वात्‌ स्थूलदेहारंभककारणमत्वात्‌ तदुक्तमर्थं विशद
यति अन्येषामिति। ब्रह्मप्रतिभासेऽस्थितं ब्रह्मणो हिरण्यगर्भस्य प्रतिभासेन संकल्पेनोत्थितमुत्पन्नं जगत्‌ सूक्ष्मभूतस्थू
लभूतलक्षणं तेन तानि देहद्वयसूचकानीति शेषः। अजस्य तु ब्रह्मपरमात्मैव कारणं न भूतानि॥ ॥ ५॥ ॥

न्वनूस्वस्वमन्ततविकारान्मनसः स्वस्वमन्ततादिसर्वजगदुत्पत्तिः कथं घटत इति चेन्न । मनसः स्वस्वमन्ततविकारत्वस्य दृष्टिसृष्टि
पक्षेऽनुपगमात्प्रदर्शितत्वादस्माभिः पूर्वमेव तत्र बीजसृष्टिप्रक्रियादृष्टिरेव सृष्टिरिति वसिष्ठसिद्धान्तस्थितेस्स्वस्वमन्ततप
भृतिसर्वस्य जगतो मनोविकारत्वे विरोधाभावात् । यदा सुप्तः स्वप्नं न कंचन पश्यति । अथास्मिन्प्राण एवैकधा भवति । तदेनं
वाक्सर्वैर्नामभिः सहाप्येतीत्यादिकाश्रुतिरपि मनसो लये सुषुप्तौ सर्वस्य जगतः प्रलयं च वलयं दर्शयन्ती दृष्टिमेव सृष्टिम
नुजानाति । ननु सुषुप्तौ प्रलये च प्रपञ्चो विलीयते किं तु कारणाभावेन प्रतीयत इत्याशयेन तथा श्रुतिराहेति चेन्न ॥ तत्र
लयाप्रतिपादने जगतः प्रबोधसमये सृष्ट्यप्रतिपादनप्रसंगात् । प्रतिपादयति च श्रुतिः । सर्वस्य सृष्टिं प्रबोधे स यदा प्र
तिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं प्रतिष्ठन्ते प्रा

ब्रह्मा संकल्पपुरुषः पृथ्व्यादिरहिताकृतिः ॥ केवलं चित्तमात्रात्माकारणं त्रिजगस्थितेः ॥ १ ॥

णेभ्यो देवा देवेभ्यो लोका इति श्रुत्यनन्तरं च दृष्टिसृष्टिविषयं भवति । असतो धि मनोऽसृज्यत मनः प्रजापतिमसृजत प्रजा
पतिः । प्रजा असृजत तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किंचेति । किंच कल्पितस्य देहस्य शुक्तिरजतादेरिव प्रतिभास
मात्रशरीरस्य प्रतिभासदशायां स्वकल्पनाधिष्ठानसन्मात्रातिरेकेण स्वरूपेणावस्थानासंभवाच्चेतिज्ञानो ब्रह्मावार्यवच
नाद्बाल्यचित्तेन च स्पंदितजीवयात्मा आकाशादि क्ष्मावसानं च पश्येदिति संक्षेपशारीरकवचनाच्च कल्पं चात्र वक्ष्यमाणपंचाभिधा
नं निगद्यते । ब्रह्मणो मनोमात्रशरीरत्वात्तत्कृतं जगन्मनोविकारत्वान्मनोराज्यवदसदेवेत्यभिप्रेत्याह ॥ ब्रह्मा संकल्प
पुरुष इत्यादिना संकल्पपुरुषः संकल्पपुरुषसम इत्यर्थः ॥ संकल्पपुरुषसमत्वमेव विशदयति । पृथ्व्यादीति । स्थूलदेहारंभ

मनसो विश्वकारणत्वे ब्रह्मवत्सत्वं स्यादित्यभिप्रायेण पृच्छति। भगवन्निति। प्रश्नवैयर्थ्यमाशंक्याह। यस्मादिति। वा
चारंभणशास्त्राद्विकारस्य मनसो नाममात्रात्ततेन सत्वमित्युत्तरमाह रामेत्यादिसार्द्धेन। व्योम्नोपि पामरैर्वाचारंभण
दिशास्त्रसंस्कृतचित्तैश्च किंचित्सद्रूपं न दृश्यत एव॥ नन्वनर्थमूलं मनो नास्ति चेत्तन्मूलोच्छेदाय प्रयत्नमानावयं कु

ब्रह्मणालभ्यते विश्वं मनस्यैवस्वयं भुवा॥ मनोमयमतो विश्वं यन्नामपरिदृश्यते॥ श्रीरामउवाच॥ भगव
न्मनसो रूपं कीदृशं वद मे स्फुटं॥ यस्माज्ञेनेयमखिला तन्यते दोषमंजरी॥ वशिष्ठउवाच॥ रामास्य मनसो रू
पं न किंचिदपि दृश्यते। नाममात्राहते व्योम्नो यथा शून्यजडाकृतेः॥ न बाह्ये नापि हृदये सद्रूपं विद्यते मनः। सर्वत्रै
व स्थितं ह्येतद्विद्धि राम यथा नभः॥ साधो यदेतदर्थस्य प्रतिभानं यथागतं। मतो वाप्यमतो वापि तन्मनो विद्धि
नेतरत्॥ यदर्थप्रतिभानं तन्मन इत्यभिधीयते। अन्यं न किंचिदप्यस्ति मनो नाम कदाचन॥ ॥ ॥ ॥ ॥

ताप्य इत्याशंक्य भ्रांतदृष्ट्याह॥ सर्वत्रैवेति। सर्वत्र स्थितत्वमलपपन्नमित्याशंकां शातयति॥ श्लोकचतुष्टयेन सार्द्धेन
साधो इति। प्रतिभानं ज्ञानं। कीदृक्प्रतिभानं तत्राह॥ यदर्थमिति प्रसिद्धिगतं घटज्ञानं पटज्ञानमिति। प्रसिद्धिमि
त्यर्थः॥ केचनेति द्विवचनां॥ ॥ ॥

एवंमनसोवंधमूलत्वं स्वरूपदिशोपंन्यासव्याघज्ञानेन समूलस्य तस्य निवृत्ताचात्मनः कैवल्यमाह ॥ संकल्पेति ॥ जगन्नाम्निसं
कल्पिजाले गलिते यदात्मस्वरूपमवशिष्यते तदभ्रूतोपमानेन विशदयति ॥ असंभवतीत्यादिना ॥ असंभवतीति सतिसप्तमी
असत्वमिति पदछेदः दिग्भूम्याद्विसकलप्रकाश्यविगमे यदिव्यापी निष्कलो विवस्वतः प्रकाशो भवति चेत्तर्हि तस्यस्वरूपं कै
वल्यावस्थायामात्मस्वरूपस्य दृष्टांतो भवतीत्यर्थः ॥ भूतोपमाने नापितस्वरूपमावेदयति ॥ अनाप्तेति अनाप्ता अखिलानांशैला

संकल्पनमनोवंश्ससंकल्पात्तच्चभिद्यते यत्र संकल्पनं तत्र मनोस्तीत्यवगम्यतां ॥ संकल्पमनसोर्भिन्ने न कदाचन केचन ॥ अ
विद्यासंसृति श्चित्तं मलो वंधो मनस्तमः ॥ इति संकल्पजालस्य नामान्येतान्निराघवा संकल्पजाले गलिते स्वरूपमवशिष्यते
असंभवति सर्वस्मिन्दिग्भूम्याकाशरूपिणि ॥ प्रकाश्ये यादृशं रूपं प्रकाशस्यामलं भवेत ॥ त्रिजगत्वमहं चेति दृश्ये सत्तामुपाग
ते द्रष्टुः स्यात्केवलीभावस्तादृशो विमलात्मनः ॥ अनाप्ताखिलशैलादिप्रतिबिंबे हि यादृशी ॥ स्याद्दर्पणे दर्पणता केवला
त्मस्वरूपिणी ॥ अहंत्वं जगदित्यादौ प्रशांते दृश्यसंभ्रमे ॥ स्यात्तादृशी केवलता स्थिते द्रष्टर्यवीक्षणे ॥ ॥ ॥

दिपदार्थानां प्रतिबिंबा येन तत्तथोक्तं ॥ दर्पणे हि धारणाविशेषेण प्रतिबिंबविभ्रमो वितनुः संप्रयोगाभावात्स्वहीताखिलप्रति
विंबं भवति ॥ तस्मिन्दर्पणे यादृशी दर्पणता कीदृशीत्यत आह ॥ केवलात्मस्वरूपिणी केवलदर्पणस्वरूपिणी ॥ अवीक्षणे
वीक्षणीयस्याभावादेव तद्विषयवीक्षणरहिते द्रष्टरि साक्षिणि तादृशी केवलता स्यात ॥ ॥

यो॰टी॰
५१

एवंविधकैवल्यप्राप्तौ मन एव विरोध्यतस्तद्विनाशे परमो यत्न आस्थेय इति दर्शनाय तस्य दौरात्म्यं श्लोकद्वयेनाह मन इत्यादिना
अपरतां देहाद्यनात्मरूपतां ॥ अथमतामितिवा। एवं केवलाशङ्कितया केवलं मन एव चलति न त्वात्मेत्यर्थः। प्रागुक्तकैवल्यप्राप्तिः
परमात्मदर्शनाद्भवतीति वृत्तस्तत्प्रकृतिकचलयमवलंब्याद्यौ परमात्मरूपप्रतिपादयति महाप्रलयेत्यादिना ॥ भिद्यते हृदयं
ग्रंथिरित्यतः प्राकृतेन सर्गादौ सृष्टिपूर्वकाले अथवा सृज्यतेनेनेति सर्गः। कारणं तदाद्यौ दृश्ये शांतमेव निर्विकारं ब्रह्मैव॥ ननु
दृश्यासत्त्ववद्दृश्यस्यासत्त्वमेव युक्तं। असद्वा इदमग्र आसीत् नासदासीन्नो सदासीत्तदानीमित्यादिश्रुतेरित्याह ॥ आस्त इति ॥ घो

मनोदृश्यमयं दोषं तनोतीमं कृयात्मकं ॥ असदेव सदाकारं स्वप्नः स्वप्नांतरं यथा ॥ स्फुरति वलातिग ॥ इति या वतेभ्रमतिमज्जति
संहरति स्वयं अपरंतां सुप्रयात्यपि केवलं चलति केवलशक्तिनया मनः ॥ वसिष्ठ उवाच महाप्रलयसंपत्तौ वं सत्त्वासमुपागते
। अशेषदृश्यसर्गादौ शांतमेवावशिष्यते ॥ आस्तेनस्तमितो भास्वानजो देवो निरामयः ॥ सर्वदा सर्वकृत्सर्वः परमात्मा महेश्व

अनस्तमितोऽज इति वाद्यंतयोर्भावविकारयोर्निषेधात्मध्यवर्त्तिनोपि चत्वारो भावविकारा निषिद्धा वेदितव्याः॥ तस्याजडत्वमाह॥
देव इति द्योतमानत्वस्य कादाचित्कत्वनिराशाय भास्वानित्युक्तं तस्य दुःखित्वं वारयति। निरामय इति। तस्येश्वरत्वमाह। सर्व इति
तत्र हेतुः सर्वकृदिति सर्वरूपेणावर्त्तत इत्यर्थः॥ पद्धानिमित्तकारणत्वमाह ॥ सर्वकृदिति ॥ सर्वकृत्त्ववत्सर्वनियामकत्वमपि तस्येत्
त्याह ॥ महेश्वर इति

राम
११
५८

ननुपरमात्मासर्वज्ञःसर्वेश्वरश्चेत्तर्हिकार्यनियम्यसापेक्षत्वेनसविकल्पःस्यादित्याशंक्याविघकमेवसर्वज्ञत्वादिकंवस्तुतोनिर्वि
कल्पमेवतस्यस्वरूपमित्यभिप्रेत्याह यतइति ॥ यतोवाचइत्यादिषुपंचदशयच्छब्दास्तच्छब्दाध्याहारेणान्तइति पूर्वेणायोजनीयाः
तस्मिन्दृष्टेपरावरइति ॥ वक्ष्यमाणतच्छब्देनवायोजनीयावागाद्यगोचरत्वेन्नतर्हिसाक्षादुपलभ्येतेत्यतआह। योमुक्तैरितिवागगो
चरस्यब्रह्मणःकथमित्येत्याशिंक्यसंज्ञास्तत्राह। यस्येति स्वाभावजास्वाभाविका। नतुमुक्तैरनुद्धयमानेपितस्मिन्वागाद्यगोचरेनास्म
कंविश्वासइत्याशंक्यतस्यविशिष्टकेवलरूपाभ्यांयथासीभवंसकलशास्त्रगम्यत्वान्नैवमित्यभिप्रायेणाह। यइति ॥ अथवा

यतोवाचोनिवर्त्तन्तेयोमुक्तैरवगम्यते ॥ यस्यवास्मादिकाःसंज्ञाः ॥ कल्पितानस्वभावजाः यःपुमान्सांख्यदृष्टीनांब्रह्मवेदां
तवादिनां ॥ विज्ञानमात्रंविज्ञानविदामेकांतनिर्मलं ॥ यःशून्यवादिनांशून्यंभासकोयोर्कतेजसां ॥ वक्तामन्ताऋतंभोक्ताद्रष्टासर्व
सदैवयः ॥

उक्तेपरमार्थवादिनांविप्रपत्तिदर्शिनांनिरालंबनविप्रतिपत्तियोगाद्विप्रतिपन्नःप्रागेवतदालंबनतयासिद्धेतस्मिन्विश्वासःका
र्यइत्याशयेनाह यःपुमानिति। योगाचारमतमाह। विज्ञानेति। एकान्तेननियमेननिर्मलमेकान्तनिर्मलमाध्यमिकमतमाह। यः
शून्येतिवस्तुतःशून्यमेवतत्त्वमित्याशंक्यानिरासायाह भासकइति। येनसूर्यस्तपतितेजसेद्धइतिश्रुतेः। अर्कतेजोभासकत्वेनप्राप्त
तद्विपरीतंजीवाद्भेदंपरमात्मनोवारयति। वक्तेति। ऋतंभोक्ताऋतस्यभोक्ताऋतशब्देनकर्मफलमुच्यते ॥ ऋतंपिबन्तौसुकृतस्यलो
कइतिश्रुतावृतशब्देनकर्मफलाभिधानात् मत्वाऋतमितिविसंधिकरणमार्षं ॥ ॥

पो॰टी॰
१२
12

वक्तामन्तास्वयंभोक्तेनिष्क्रियितसर्वव्यवहारसाधकेऽस्मीति सोऽपि भासके प्रत्यक्कृतमेतत्त्वे कथं वादिनां विप्रतिपत्त्यवकाश इत्याशं
क्यरागादिदूषिततया स्वस्वमतग्रहणासमर्थबुद्धित्वात्तदवकाशः संभवतीत्याशयेनाह सन्नपीति॥ जगति सन्नपि परमात्मा दृश्य
ते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरित्युक्तविशिष्टबुद्धिरहितानामसन्निव भवति॥ सत्त्वफलाभावाद्देहस्थोऽदूरग इव भवति
तेषां वर्षसहस्रकोट्यापि तैरप्राप्यत्वात्॥ तस्यैव परमात्मनो जडप्रकाशकत्वनियामकत्वे क्रमेण श्लोकद्वयेनाह॥ चिदिति॥ घट
स्फुरति। परः स्फुरतीत्यनुभूयमानं चित्प्रकाशो यस्माद्विदात्मानः परस्ततः। प्रकृतिरेव व्रततिर्लता वल्ली व्रततिर्लतेत्यमरः॥ ब्रह्मा

सन्नप्यसन्न जगति यो यो देहस्थोऽपि दूरतः॥ चित्प्रकाशो ह्ययं यस्मादालोक इव भास्वतः॥ प्रकृतिर्व्रततिर्यस्मिञ्जाता ब्रह्माण्डसत्फला
चित्तमूलेन्द्रियदला येन नृत्यति वायुना॥ यश्चिन्मणिः प्रकचति प्रतिदेहसमुद्गके यः प्लावयति संरब्धं पुर्यष्टकमितस्ततः॥ ॥

ण्डमेव सच्छोभनं फलं यस्याः सा तथोक्ता॥ ननु जगद्भासकान्नियामकाच्च परमात्मनस्तद्विपरीतस्य जीवस्य भेदो युक्त इत्याशंक्य स ए
ष इह प्रविष्टः। नान्योऽतोऽस्ति द्रष्टा रूपं रूपं प्रतिरूपो बभूवेत्यादिश्रुतिप्रापितं तस्यैव जीवस्वरूपेणावस्थानमाह॥ यश्चिदिति॥ प्र
कचति स्फुरति। समुद्गकः संपुटकः। प्रकृतिर्व्रततिरित्यनेनाधिदैवाभिप्रायेण नियामकत्वमुक्त्वा आध्यात्मिकाभिप्रायेणाह॥
यः प्लावयतीति॥ इतस्ततः संरब्धं संक्षुब्धं पुर्यष्टकं यः प्लावयति॥ गमयति चालयतीत्यर्थः। पुर्यष्टकस्वरूपं महद्भिरुक्तं ज्ञानेन्द्रियाणि
खलु पंच तथापराणि कर्मेन्द्रियाणि मनआदि चतुष्टयं च॥ प्राणादिपंचकमथो वियदादिकं च कामश्च कर्म च तमः पुनरष्टमी पूरिति॥

राम
१२
५९

ननु परमात्मैव शरीरमाविश्य संसरति चेत्तर्हि कस्य कथं कैवल्यमित्याशंक्य वस्तुतो संसारिणि तस्मिन्विपरीतभावनाप्राप्तिस्य संसा
रस्य तत्सम्भावनायां निहत्य सुपपन्नो घटत एव कैवल्यमित्याह शुद्ध इति । अविघातत्कार्यरहितः संविद्रूपत्वाद्व्योमचिंतयाकाशसंकल्पत्व
चिंतया खंत्ववेद्याकाश्यकल्पं भवेत् ॥ अथवा योनीवभावमापन्नं परमात्मा व्योमचिंतया खं भवेद्ब्रह्म भवेत् ॥ पदार्थचिंतया अनात्म
पदार्थचिंतया अधिसंसारोपरि स्थितः अधिष्ठितः अथवा पदार्थचिंतया अधिष्ठितो विषयीकृतः सन्नर्थत्वमाकाशादि पदार्थ
गच्छतीवा पदार्थचिंतयार्थत्वमिव गच्छतीत्युक्तं प्रपंचयति । आविर्भावेत्यादि श्लोकद्वयेन । अतितते ऽतिशयेन व्याप्ते यस्मि

शुद्धः संविन्मयः स्वात्मा खं भवेद्व्योमचिंतया । पदार्थचिंतयार्थत्वमिव गच्छत्यधिष्ठितः ॥ आविर्भावतिरोभावमयास्त्रिभुव
नोर्मयः स्फुरंत्यतितते यस्मिन्मरुविव मरीचयः ॥ कुर्वन्नपीह जगतां महतामनंतं वृंदं न किंचन करोति कदाचनापि स्वात्म
न्यनस्तमयसंविदि निर्विकल्पे त्यक्तोदयस्थितिमतिः स्थित एक एव ॥ ॥

न्यचिदर्णव आविर्भावतिरोभावप्रधानाः त्रिभुवनतरंगास्स्फुरंति स परमात्मास्तीति पूर्वेणान्वयः ॥ तस्मिन्नदृष्टे पारावारइसु न
रेणावान्वय इत्यवादिष्म जगतां वृंदं समूहं मायया कुर्वन्नपि वस्तुतो न करोति । त्यक्तोदयस्थितिमतिः उत्पत्तिसंकल्पो येन स त्य
क्तोदयस्थितिमतिः ॥ अथवा त्यक्तोदय इति भिन्नं पदं त्यक्त उदय उत्पत्तिर्येन स तथा । स्थितिरस्यास्तीति स्थितिमान् । तस्मिन्निश्च
ल इत्यनेन ॥ अनस्तमयसंविदि नाशरहितचिद्रूपे स्वात्मनि स्थितो निराधारः स्थित इत्यर्थः

यो॰टी॰
१३
13

एवमात्मस्वरूपं प्रतिपाद्य तद्विज्ञानफलमाह ॥ भिद्यत इति ॥ हृदयग्रंथिरहंकारः परावरे परब्रह्मदृष्टः। अवरोतिकष्टस्तद्रूपे सर्वात्मिनी स
र्थः ॥ परमात्मव्यतिरिक्तस्य सर्वस्य कल्पितत्वासंभवादद्वैतज्ञानं दुर्लभमित्याक्षिपति ॥ इयत इति ॥ ब्रह्मविज्ञं गरुडकमद्वैतशास्त्रस्य
निरंतराभ्यासादतिसुलभमद्वैतज्ञानमिति परिहरति ॥ सात्त्विति ॥ किं तच्छास्त्रं यत्परः परां धियं प्राप्नुयादिति तत्राह ॥ सर्वेषामिति ॥ इ
तिहासानां भारतादीनां मध्ये सारत्वेहेतुमाह श्रुत इति ॥ जीवन्मुक्तत्वं विदेहमुक्तत्वस्योपलक्षणं ॥ अद्वैतज्ञाना यद्वैतविलय एवतदु

भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः । क्षीयंते सर्वकर्माणि तस्मिन्दृष्टे परावरे ॥ श्रीरामउवाच ॥ इयतोदृश्यजातस्य ब्रह्मा
ण्डस्य जगतः स्थिते ॥ मुने कथमसत्तास्ति क्व मेरुः सर्षपोदरे ॥ वसिष्ठउवाच ॥ साधुसंगमसच्छास्त्रपरो भवसि राम चेत् तद्दिने
रेव नो मासैः प्राप्नोषीमां परां धियं ॥ सर्वेषामितिहासानामयं सारउदाहृतः । श्रुतेस्मिन्निर्मलेयस्माज्जीवन्मुक्तत्वमव्ययं उदे
ति स्वयमेवांतरिंदमेव विचारय ॥ स्थितमेवास्तमायाति जगद्दृश्यं विचारणात् ॥ नरणां ज्ञानैकनिष्ठानां आत्मज्ञानविचारि
णां साक्षाज्जीवन्मुक्ततोदेति विदेहोन्मुक्ततैव या

चितोपायेन कार्यः किं विचारेणेत्यत आह ॥ स्थितमिति ॥ एवशब्दो विचारणादित्यनेनापि संबध्यते । जगद्दृश्यमधिष्ठानसाक्षात्का
रपर्यवसायिविचारादेव । छायारोपितपिशाचवदस्तमायाति न तु मुद्गरप्रहारादिना तत्रापि यथास्थितमेवास्तमायाति ॥ नावयववि
श्लेषादिद्वारा ॥ श्रुतेस्मिन्निर्मल इत्यादिनोक्तं विवृणोति ॥ नरणामिति

राम
१३
६०

ब्रह्मन्निति स्पष्टार्थः जीवन्मुक्तस्य स्वानुभवैकगम्यं लक्षणमाह यथेति। प्रतिभासमात्रेण परदृष्ट्या वा व्यवहारवतोपि यस्य
यथास्थितमिदं जगत्तत्त्वदृष्ट्यास्तंगतं व्योम ब्रह्म स्थितं वा भवति स जीवन्मुक्त इत्युच्यते। तस्य परवेद्यमपि लक्षणमाह
नोदेतीति।। यथा प्राप्तव्यवहारे स्थितिर्यस्य स तथोक्तः पुनरपि स्वानुभवगम्यं लक्षणमाचष्टे यो जागर्तीत्यादि श्लोकत्रयेण
स्वव्यतिरिक्तस्य द्वैतस्य वस्तुतोऽननुभावाज्जीवन्मुक्तः सुषुप्तस्थो भवति। यथा विषयसंनिधानादावपि निर्विकारत्वात्सुषु

१ श्रीराम उवाच ब्रह्मन्विदेहमुक्तस्य जीवन्मुक्तस्य लक्षणं ब्रूहि येन तथैवाहं ते शास्त्रगया दृशा वसिष्ठ उवाच
।। यथास्थितमिदं यस्य व्यवहारवतोपि वा अस्तंगतं स्थितं व्योम स जीवन्मुक्त उच्यते नोदेति नास्तमायाति सुखे दुःखेषु
मुखप्रभा यथा प्राप्तस्थितिर्यस्य स जीवन्मुक्त उच्यते यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते
रागद्वेषभयादीनामनुरूपं चरन्नपि योऽन्तर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते।। ।।

मः द्वैताभासोपलब्धावपि जागर्त्येव अथवा साक्षाद्दृश्यमानब्रह्मत्वाज्जागर्त्येव तथा चोक्तं सर्वेश्वरेण तस्यां जागर्ति सं
यमीति।। यस्य जाग्रज्जागरणमनुवृत्तं न वर्तते निर्वासनः स्वानुवासन इत्यर्थः।। सकलवासनाविलये जीवन्मुक्तता संभवात्।।
रागद्वेषभयादीनां प्रारब्धकर्मवेगेणोपस्थितानां रागद्वेषभयाभासादीनामनुरूपमनुकरणं यथा तथाचरन्नचेष्टमानो
पि योऽविक्षोभं तत आत्मस्वरूपतो व्योमवदत्यच्छो निर्मलो भवति। यथा व्योम निर्मलमेवमेवात्मापि रागादिमलरहित इति विज्ञा

यो॰टी॰
१४

मस्य विदुषोहंकृतोहंकर्त्तेत्येवं विधोभावोभावनाज्ञानंनभवति। इंद्रियाणींद्रियार्थेषुवर्त्तंतेनाहं। अहंतुतद्व्यापारसाक्षीस्मकर्त्ते
त्येवंपश्यतीत्येतत्। यस्यबुद्धिस्तत्कारणेनलिप्यतेनानुशयिनीभवति। अहमिदंनिषिद्धंकृतंवानिंदंविहितंनाकार्षंतस्मान्नरके
पतिष्यामीत्येवंयस्यबुद्धिर्नलिप्यते। यस्मादित्यादयोनिरामयमित्यन्तास्पष्टार्थाः। क्वचित्किंचिद्विविच्यते। कलावानपिअवि

यस्यमाहंकृतोभावोयस्यबुद्धिर्नलिप्यते कुर्वतोकुर्वतोवापिसजीवन्मुक्तउच्यते यस्मान्नोद्विजतेलोकोलोकान्नोद्विजते
चयः हर्षामर्षभयोन्मुक्तःसजीवन्मुक्तउच्यते शांतसंसारकलनःकलावानपिनिःकलःयःसचित्तोपिनिश्चित्तःसजीवन्मु
क्तउच्यते यःसमस्तार्थजातेषुव्यवहार्यपिशीतलः परार्थेष्विवपूर्णात्मासजीवन्मुक्तउच्यते जीवन्मुक्तपदंत्यक्त्वास्व
देहेकालसात्कृते। विशत्यदेहमुक्तत्वंपवनोऽस्पंदतामिव विदेहमुक्तोनोदेतिनास्तमेतिनशाम्यति। नसन्नासन्नदूरस्थो
नचाहंनचचेतरः ततस्तिमितगंभीरंनतेजोनतमस्ततं अनाख्यमनभिव्यक्तंसत्किंचिदवशिष्यते॥ ॥ ॥

द्ययासावचयो। पिनिष्कलःवस्तुतोनिरवयवः। सचित्तोपिचित्ताभासेनसहवर्त्तमानोपिनिश्चित्तोवस्तुतश्चित्तरहितःपरार्थेषुप
रस्वामिकवस्तुषुव्यवहारीवशीतलस्तापरहितःखेदरहितइत्यर्थः उपलक्षणमेतद्दर्परहितत्वस्यनहिजीवन्मुक्तस्याभिमानव
र्जितस्यसमस्तार्थजातस्यसाकल्पेनवैकल्पेनवाहर्षोविषादोवासंभवति॥ नसन्नासन्नकार्यकारणमित्यर्थः॥ ॥

राम
१४
६१

न शून्यं न निराकारमित्यर्थः॥ किमपि सदसं न तथा स्थितमिति संबंधः॥ न सदिति सन्न भवति घटादिवदसत्त्वाज्ञानेस्तत्रानयुग
मातृसद्दृश्यप्रकाशरूपत्वाद्वा असन्न भवति परमार्थसद्रूपत्वात॥ सदसत्त्वं न भवति विरोधाद्वा अभावो भवेन सचित्त्वेत्यर्थः॥ भावन
चिंता॥ चेत्यं दृश्यं आदिमध्यपर्यंता न विद्यंते यस्मिन् तदनादिमध्यपर्यंतं अनाधिमनः पीडारहितं निरामयं शरीरपीडारहितं यदेवं विध
चिन्मात्रं तद्धि देहमुक्तं उत्पन्न इति शेषः॥ एवं विदेहमुक्तस्वं परमार्थरूपमाख्याय तत्साक्षात्कारोपायमाह दृष्टिति दृष्टदर्शनदृश
निज्ञातृज्ञानज्ञेयानि तेषां मध्ये यद्दर्शनं तेषां साक्षितया स्थितं द्रष्टा स्फुरति दर्शनं स्फुरति दृश्यं स्फुरतीत्येवं स्फुरणरूपेण तेष

न शून्यं नापि चाकारि न दृश्यं नापि दर्शनं॥ न च भूतपदार्थौघसदनंततया स्थितं॥ किमप्यव्यपदेशात्मा पूर्णात्पूर्णतराकृतिः॥ न सन्नासन्न सदसन्न भावो भावनं न वा॥ चिन्मात्रं चेत्यरहितमनंतमजरं शिवं॥ अनादिमध्यपर्यंतं यदनाधिनिरामयं॥ दृष्टृदर्शनदृश्यानां मध्ये यद्दर्शनं स्थितं॥ साधो तदवधानेन तदेतदवबुध्यसे॥ श्रीराम उवाच॥ परमार्थस्य किं रूपं तस्यानंदघिदाकृतेः पुनरेतन्ममाभावकृतनिर्वाणबोधहृद्दये॥ ॥

युगतं तद्विलक्षणं निर्विकल्पं प्रत्यक्चैतन्यं स्थितमित्यर्थः॥ तदवधानेन तस्मिन्स्थितैकाग्र्येण अथवा तदभिधानेन तन्निश्चयेन शोधि
त त्वंपदार्थसाक्षात्कारेणेत्यर्थः॥ तदेतदवबुध्यसे॥ पूर्वोक्तमर्कनाच प्रतिपादितं परमार्थस्वरूपमवगच्छतीत्यर्थः महाप्रलयसंपन्ना
वित्यादिना यत्परमार्थस्वरूपं प्रतिपादितं पुनश्च विदेहमुक्तस्वरूपतया नंतरमेव यन्निरूपितं तद्विदमिति करतलामलकवद्दिशातुं पृष्ठ
तिरामः परमार्थस्येति॥ ॥

यो०टी
१५

परमार्थस्वरूपंशृंगग्राहिकयादर्शयितुमाहमहाघनलयेति॥ तदिदंत्वार्पितइति। तत्परंब्रह्मइदंत्वार्पितप्रत्यङ्मुखंत्वार्पितइत्यर्थः तत्रना
शयित्वेत्यादिश्लोकचतुष्टयेनसमाध्यवस्थामवलंब्यपरमार्थस्वरूपमाह॥ समाध्यवस्थायांमनसोवृत्तेर्योनश्यंत्यपिमनोनन
श्यतीत्यतआहमनसोवृत्तिसंक्षयइति। मनसोवृत्तीनांशब्दाद्याकाराणांसम्यक्क्षयेसतिस्वामात्मानंशरीरत्रयात्मनावर्त्त
मानंनाशयित्वाभिमानमात्रप्रापितशरीरत्रयात्मत्वमात्मनस्समाधावभिमाननाशोनश्यतिमित्रतइत्यभिधीयतेनाशयित्वा

वसिष्ठ उवाच॥ महाघनलयसंपन्नौसर्वकारणकारणं। शिष्टमेतत्परंब्रह्मतदिदंत्वर्पितंशृणु॥ नाशयित्वास्वमात्मा
नंमनसोवृत्तिसंक्षये॥ सद्रूपंयदनाख्येयंतद्रूपंतस्यवस्तुनः॥ चितेर्जीवस्वभावायायदचेत्योन्मुखंवपुः॥ चिन्मात्रंवि
मलंशांतंतद्रूपंपरमात्मनः॥

स्वमात्मानमिति॥ अत्रसाध्याहारंयोजनास्वमात्मानंनाशयित्वाअवस्थानेजातिगुणक्रियादिरहितत्वादनाख्येयंयत्सद्रूपं
वृत्तिसंक्षयसाक्षिरूपमस्तितत्तस्यब्रह्मवस्तुनोरूपंस्वरूपमुच्यते॥ चितिःस्वभावश्चस्वरूपंयस्याःसाजीवस्वभावातस्याश्चि
तेरचेत्योन्मुखंविषयोन्मुखंयद्वपुःस्वरूपमस्तिकीदृशंतदित्याहचिन्मात्रंविमलंशांतमिति। निर्विकल्पंचिदेकस्वरूपं
अनाद्यागंतुकमलद्वयरहितंनिर्विकारंचतत्परमात्मनोरूपंस्वरूपमुच्यते॥ रामायनमः॥ ॥ ॥

राम
१५
६२

अंगलग्न इति। अवयवसंगतेति। वातातपादेरस्य शरीरानुभवं स्पर्शत्वादेरनुभवं विना चेतसश्चेत्यौपाधिकजीवस्य यद्रूपमस्ति। त्यक्तशरीरस्य जीवस्य स्वरूपमंगलग्नेपि स्पर्शाद्यनुभवरहितं भवतीति। तदेवमवच्छेदार्थमाह। जीवत इति। तदात्मनः परमं संसारातीतं स्वरूपं अस्वप्नाया इति। जागरितमपि दीर्घस्वप्न इति स्वप्नेघशब्देन गृह्यते। अस्वप्नायाः स्वप्नजागरितरहिताया अजडायाः सुषुप्तिरहितायाअनंतवस्तुविषयत्वादनंतायाश्चिरनिद्रायाश्चिरकालयोगनिद्राया यद्रूपं तद्रूपमित्यादि समानं एतदुक्तं भवति। तुरीयावस्थानलक्षणायोगनिद्रायां सन्निर्विकल्पचिद्रूपं प्रतीयते॥ तत्परमात्मनः स्वरूपमिति। विक्षेपदशामवलंब्यापि परमार्थस्वरूपमाह। भवे

अंगलग्नेपि वातादौ लस्पर्शानुभवं विना॥ जीवतश्चेतसो रूपं यत्तत्परमात्मनः॥ अस्वप्नाया अनंताया अजडाया महामते यद्रूपं चिरनिद्रायां तद्रूपं परमात्मनः॥ वेदनस्य प्रकाशस्य दृश्यस्य तमसस्तथा॥ वेदनं यदनाद्यंतं तद्रूपं परमात्मनः॥ व्यवहारपरस्यापि यत्पाषाणवदासनं॥ अव्योम्न एव व्योमत्वं तद्रूपं परमात्मनः॥ ॥ ॥

दनस्येत्यादि श्लोकत्रयेण वेदनस्यांतःकरणवृत्तिलक्षणस्य प्रकाशस्यादित्यादिसंबंधिनो दृश्यस्य शब्दादिवेद्यस्य उपलक्षणमेतत्प्रकाशस्यातमसोज्ञानस्य यद्वेदनं साक्षिलक्षणमस्ति तदित्यादि पूर्ववत्॥ व्यवहारपरस्येति भ्रांत्या व्यवहारपरस्यापि जीवस्य वस्तुदृष्ट्या पाषाणवद्घनासनं प्रौढशिलावन्निश्चलतयावस्थानं॥ अव्योम्न एव मृषा सप्रपंचस्यैव व्योमत्वं वस्तुतो निःप्रपंचत्वं यद्व्योम्न एव लौकिकदृष्ट्या नाकाशसदृशस्यैव व्योमत्वं वस्तुतस्तु आकाशसदृशत्वं यत्तदित्यादि समानं॥ ॥ ॥ ॥

वेद्यवेदनवेत्तृत्वरूपत्रयं वेद्यत्ववेदनत्ववेत्तृत्वरूपाणां त्रयं पुरः प्रत्यक्षं सद्यत्राधिष्ठान उदेति उत्पद्यते। अस्तमायाति नश्य
ति च तद्रूपं॥ अभूतोपमानेन परमात्मस्वरूपं प्रतिपादयति॥ स्थावराणामिति॥ स्थावराणां स्थावरादीनां स्वभावतो मनोबु
द्ध्यादिनिर्मुक्तं हि प्रसिद्धं यद्रूपमस्ति तद्बोधमयं स्वरूपं कदाचिद्वेद्यत्वेन हि तत्स्वरूपं परेण परमात्मनो पमीयते। अर्थात् भिन्न
उपमानमित्युक्तं भवति॥ उपसंहरति॥ ब्रह्मेति ब्रह्मविष्णुहरारज आदित्यगुणोपाधयः सदाशिवो गुणसाम्यसाक्षी आदिशब्दे

वेद्यवेदनवेत्तृत्वं रूपत्रयमिदं पुरः॥ यत्रोदेत्यस्तमायाति तद्रूपं परमात्मनः॥ स्थावराणां हि यद्रूपं तद्बोधमयं भवेत्॥
मनोबुद्ध्यादिनिर्मुक्तं तत्परेणोपमीयते॥ ब्रह्मार्कविष्णुहरशक्रसदाशिवादिशांतो शिवं परममेतदिहैकमास्ते॥ सर्वो
पाधिक्षयवशादविकल्परूपं चैतन्यमात्रमयमुज्झितविश्वसंगं॥ इतिश्रीवाल्मीकीये मोक्षोपाये उत्पत्तिप्रकरणे
प्रकारणार्थनिर्देशः॥ ॥

न सगुणसाम्योपाधिर्महेश्वरादिर्ग्रह्यते। शिवं मंगलमानंदरूपमित्यर्थः॥ अविकल्परूपं निर्विकल्पस्वरूपं तत्र हेतुमा
ह॥ सर्वोपाधिक्षयवशादिति सर्वोपाधिनाशवशात् चैतन्यमात्रमयं चैतन्यमात्रस्वरूपं॥ उज्झितविश्वसंगं त्यक्तसर्वसंगं
इतिश्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मसुखस्वरूपपादशिष्यश्रीमदात्मसुखकृतौ वासिष्ठचंद्रिकायामुत्पत्तिप्रकरणे
आकाशजाख्यानं नाम पंचमः सर्गः पूर्णः॥ ॥

पूर्वस्मिन्नाकाशजाख्याने चिन्मात्रस्वरूपस्य परमात्मनो माया मनोभूत्वा जगत्सृजतीत्युक्तं। इदानीं मायाया बहुदुर्घटहेतुत्वं
जगन्मायिकत्वनिश्चयदार्ढ्याय प्रपंचयितुं लीलाख्यानमवतारयति ॥ अत्रेदमिति ॥ तथा च महर्षिणोक्तं। पूर्वत्राकाशजाख्याने
चिन्मात्रस्य परात्मनः। या माया सा मनो भूत्वा सृजतीत्युपवर्णितं। लीलाख्यानेन मायाया बहुदुर्घटहेतुना। प्रपंच्यते मायिकत्वं तं
जगत्येतत्स्फुटीभवेदिति ग्रंथास्तु द्विनाकाशमित्यतः प्राह्नुताः स्पष्टार्थः। क्वचित्किं विद्धि विभ्रमतो। कुलपद्मः कुलालंकारः पद्म

वसिष्ठ उवाच ॥ अत्रेदं मंडपाख्यानं शृणु श्रवणभूषणं ॥ निःसंदेहो यथैषोऽर्थश्चित्ते विश्रांतिमेतिते ॥ आसीदस्मिन्मही
पीठे कुलपद्मो विकाशवान्। पद्मो नाम नृपः श्रीमान्बहुपुत्रो विवेकवान् ॥ मर्यादापालनांभोधिर्द्विषत्तिमिरभास्करः। स
द्गुणहंसानां दोषतृण्याहुताशनः ॥

शब्दो वा पुल्लिंगं भवति वा पुंसि पद्म इत्यमरः ॥ विकासवान्कीर्तिमान् अथवा सुखविकाशवन्नित्यप्रमुदितमुखश्चेति यावत्। म
र्यादापालनांभोधिर्मर्यादापालने अंभोनिधितुल्यः। यथांभोधिर्वेलां मर्यादां नातिक्रामति तथा वर्णाश्रममर्यादां नातिक्रामती
त्यर्थः ॥ द्विषत्तिमिरभास्करः शत्र्वंधकारसूर्यः ॥ सद्गुणाः शोभनगुणास्त एव हंसास्तेषां सरः। दोषतृण्याहुताशनः ॥ दोषा एव तृण्या
तृणसमूहस्तस्य हुताशनोऽग्निः। पाशादिभ्यो य इति समूहार्थे तृणशब्दाद्यप्रत्ययः ॥ ॥ ॥

शोभनो भगः श्रीर्यस्याः सा सुभगाः। कमला लक्ष्मीः॥ उदिता उत्पन्ना अवनिर्भूमिः॥ अवनावुदिता कमलेवेति संबंधः। भ
र्त्तर्युद्विग्ने संतप्ते समिद्धो उद्विग्ना प्रकर्षेण संतप्ता भवति। यौवनोल्लासवान्। यौवनोद्रेकवान्। ज्ञानं ब्रह्मविषयं विद्यादेव

तस्यासीत्सुभगा भार्या लीलालीलाविलासिनी। सर्वसौभाग्यवलिता कमलेवोदितावनौ। भर्त्तर्युद्विग्नासुदि
ते सुदिता ससा प्रतिबिंबसमाकांता सांद्रकुड्ये केवलं भीता विकदाबितं यामास शुभसंकल्पशालिनी। प्राणेभ्यो
ऽपि प्रियो भर्त्ताभिष्टेन चज्जगतीपतीः। यौवनोल्लासवान् श्रीमान् कथं स्यादजरामरः॥ भवानिति न कथं साकरं मे शुभ
शतान्यहं। ज्ञानवृद्धांस्तपोवृद्धान्विद्यावृद्धान् अहं द्विजान्। पृष्ट्वा मितावन्मरणं कथं न स्यान्नृणामिति। इत्यानीयाथ
संपूज्य पप्रच्छ सानता। अमरत्वं कथं विप्रा भवेदिति पुनः पुनः। विप्रा ऊचुः। तपोजपयमैर्बौध समस्तापि
द्धसिद्धयः। संप्राप्यं वै मरत्वं तु न कथंचन लभ्यते॥ ॥

तावद्धर्मादिविषया इत्यानीयेष्वेति शाह्यस्यपृच्छिन्न यामासेति पूर्वेणान्वयः। हे विप्राः मर्त्या नाम मरत्वं कथं भवेदिति पुनः पुनः
पप्रच्छेत्यन्वयः॥ यमा अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः सिद्धानां सिद्ध्यो णिमादयः सिद्धसिद्धयः॥ ॥

तन्नर्हिआत्मन्यद्वितीयानंदस्वरूपेसंस्थास्यसेसम्यक्पुनरुन्मज्जनायोगपतयास्थितिंकरिष्ये।तत्तदात्रमद्गृणितजीवेपरित्रमत
पतिजीवेशुद्धांतंमंडपेतरस्तुरमंडपेआतोषंतुशिष्टपर्यंतंआस्थिताआश्रिता॥प्राज्ञोधर्मार्थभिज्ञः।विद्वान्ब्रह्मवित्त॥देवद्विजगु

इत्याकर्ण्यद्विजमुखाद्विंतयामाससासुनः।इदंस्वप्रजयेवाश्रुभीताप्रियवियोगतः।मरणंभर्तुरस्यमेयदिदैवोऽद्यविष्य
ति।तत्सर्वदुःखनिर्मुक्तासंस्थास्येसुखमात्मनि।अथवर्षसहस्रेणभवादीवेत्त्ररिष्यति।तत्करिष्येयथायेनजीवोगेहान्नया
स्यति॥तद्भूमभर्तृजीवेस्मिन्द्विजेशुद्धांतमंडपे।भर्त्रावलोकितानित्यंनिवत्स्यामियथासुखं।अद्यैवारभ्यैतदर्थंदेवीज
प्तिंसरस्वतीजपोपवासनियमैरातोषंपूजनयाम्यहं।इतिनिश्चित्यसानाथमनुक्त्वैववरांगना॥यथाशास्त्रंचकारोग्रंतपो
नियममास्थिता।त्रिरात्रस्यत्रिरात्रस्यपर्यंतेकृतपारणा॥देवद्विजगुरुप्राज्ञवृद्धपूजनापरायणा।स्नानदानतपोध्यानेनि
त्योद्युक्तशरीरकासर्वास्तिक्यसदाचारकारिणीक्लेशहारिणी।त्रिरात्रशतमेवंसाबालानियमशालिनी॥ ॥ ॥

उघाज्ञवृद्धपूजापरायणेतिकेचित्।स्नानदानतपोध्यानेषुनित्यमुद्युक्तंशरीरंयस्याःसातथोक्ता।सर्वास्तिकेनसदाचारका
रिणीसर्वास्तिक्यसदाचारकारिणी॥ ॥

अनारतंसततंतपोनिष्ठामवलंब्यातिष्ठदित्यध्याहारः॥ अथवातिष्ठदित्यंतर्भावितण्यर्थः॥ अस्थापयदित्यर्थः॥ प्रति
मानिताप्रतिपूजिता आदरातिशयद्योतनाय पूजिताप्रतिमानितेत्युक्तं॥ प्रतिमागतेतिकेचित्॥ भर्तृभक्त्यतिशायिनेतिभ

अनारतंतपोनिष्ठामतिष्ठत्कष्टचेष्टया॥ त्रिरात्राणांशतेनाथपूजिताप्रतिमानिता॥ तुष्टाभगवतीगौरीवागीशास
मुवाचतां॥ निरंतरेणतपसाभर्तृभक्त्यतिशालिना॥ परितुष्टास्मितेवत्सेगृहाणवरमीप्सितं॥ राज्ञ्युवाच॥ जपजन्म
नराज्वालादाहदोषशशिप्रभे॥ जयहार्दांधकारौघनिवारणरविप्रभे॥ अंबमातर्जगन्मातस्त्रायस्वकृपणामिमां
इदंवरद्वयंदेहियदिहप्रार्थ्यतेमया॥ एकंतावद्धिदेहस्यभर्तुर्जीवोममांतिकात्॥ अस्माद्देविहिमायासीन्निर्जातः
पुरमंडपात्॥ द्वितीयंतुमहादेविप्रार्थयेहंयदायदा॥ दर्शनायवरार्थेनतदामेदेहिदर्शनं॥ इत्याकर्ण्यजगन्मातातास्त
थास्त्वेवमितिस्वयं॥ उक्त्वांतर्धानमगमत्सोक्त्वायोमिशिवाराणी॥ अथसाराजमहिषीपरितुष्टेष्टदेवता॥ पूर्णवांछ
तवर्षेणबभूवानंदधारिणी॥ ॥

र्तृभक्त्यतिशयितेनजन्मजरा एवज्वालास्ताभिर्दाह एवदोषःस्तच्छामकशशिप्रभेहृत्संबंधीहार्दः॥ विदेहस्यमृतस्यवरार्थेनत
रुपयोजनेनहेतुनादर्शनाययदायदात्वांप्रार्थयेतदादर्शनंद्वितीयंवरंमेदेहीत्यन्वयः॥ ॥ ॥

पद्ममासर्तुकटक इत्यादीनि पंच कालनचक्रस्य विशेषणानि पद्ममासर्त्तवः कटकं नाभिवलयो यस्य तत्तथा। भ्रमन्नितं वेवलंयेव
कटको स्त्रियामित्यमरः। दिनान्यारा यस्य तत्तथा नाभिमारभ्य नेमिपर्यंतं परितः समर्पिता॥ अयो विकाराः अराउच्यंते। पद्ममावर्षदंडके

पद्ममासर्तुकटके दिनारे वर्षदंडके रुणनाभौ स्यंदमये कालचक्रे वहत्यथ॥ अंतर्द्धिमाजगामास्याः पत्युः स्वचेतनं ततो॥ मृते
तस्मिन्महीपाले शोकसंतापपीडिता॥ निर्जलानलिनीवासौ परांस्तानिख पोययौ॥ क्रिचमाक्रंदिनी क्रिजंमौनमूकावियोगि
नी॥ बभूव कैवाकीचमानिनीमरणोन्मुखी॥ अथतामतिमात्रविह्वली सकृपोकाशभवा सरस्वती॥ शफरी उद्दशोषविह्वलं
वथमाह्वहिरिवात्वकं पत्र॥ सरस्वत्युवाच॥ शावीमूतमिमं वत्से भर्त्तारं पुष्पखंडके॥ अछायस्थापयैनं त्वं पुनं भर्त्तारिमा
प्स्यसि॥ पुष्पाणिस्तानि मेष्यंति तेनोनवैषविनंक्ष्यति॥ मृयश्च न च भर्त्तृत्वमविरेणा करिष्यति॥ एतदीपश्चजीवोमासाकाश
विशदस्तव॥ न निर्यमिष्यति क्षिप्रमितो तः पुरमंडपात्॥ ॥

संवत्सराक्षके नाभिः पिंडिकास्यंदः स्वरूपेन विगतेः कालव्यंजकत्वेनोपचारात्तन्मयत्वमुक्तं। वहतीतिसतिसप्तमी॥ इष्टवियोगं
जं दुःखं शोकः तयोर्दुःखमात्रं। नलिनी पद्मिनी। अतिमात्रविह्वला मत्यर्थ परवशा। शफरीमत्स्यावांतरजातिः॥ प्रोष्ठीतु शफरी द्वयो
रित्यमरः॥ कुड्मतस्मि केतिके वित्त॥ पुष्पकंडके पुष्पसमूहे॥ ॥ ॥

पारी
१८

19

आज्ञापयामासेति। निजर्थोत्राविवक्षितः॥ आजुहावेत्यर्थः॥ ब्रह्मणि विदिते सति तस्मिन् शिवत्वद्दृष्टिनिरोधालकाघोगा ह्योनिजना
गोचरपदार्थदर्शनसामर्थ्यं संभवति। यतस्ततो लीलाया अंतःपुरमंडपाकाशे वर्त्तमान भर्त्तृदर्शनसामर्थ्यसिद्ध्यर्थं ब्रह्मस्वरूप
प्रतिपादयति॥ भगवती सरस्वती॥ चिदाकाशमित्यादिश्लोकद्वयेन॥ ननु वक्ष्यमाणविदूरथभार्याम्रितलीलाद्याइव ब्रह्मप्रतिपादकं वि
नापि लीलायैस्वेष्टं तद्दर्शनसामर्थ्यं कुतो न ददाति सरस्वती॥ ब्रह्मप्रतिपादनादावेव कुतः प्रवर्त्तत इति चेन्न उच्यते॥ लीलया

सद्दिव्यां भारतीं श्रुत्वास्थापयित्वा तथा पतिं॥ इत्वा दाज्ञापयामास देवी ज्ञप्तिसरस्वती॥ सरस्वत्युवाच॥ किं स्मृतास्मिं त्वयाव
त्से वद शोकि मति शोकवां॥ इत्युपेसु पुरोजशिस्तामुवाच सरस्वती॥ लीलोवाच॥ कमभाव स्थितो भर्त्ता किं करोत्यथ कीदृशः
समीपं नय मां तस्य नैकाश क्रोमि जीवितुं॥ ज्ञप्तिरुवाच॥ चिदाकाशं चिदाकाशमाकाशं च तृतीयकं॥ द्वाभ्यां शून्यतरं विद्धि

लीलां तरवत्सांसारिककलाभिलाक्षेणाराधितत्वादीश्वर्यासं साराप्तष्टक्का भवेयमित्यभिसंधायाराधितत्वास्सा तदनुकूलमेव
वप्रवर्त्तते। चिन्मेवस्वच्छत्वसूक्ष्मत्वादिनाकाशकल्पत्वाद चिदाकाशं चिन्यंतरमात्मेवाकाशं चिदाकाशमाकाशं च महाभूतं संज्ञं
तृतीयमस्ति स्वच्छत्वसूक्ष्मत्वादिना जगति प्रसिद्धेषु तेषु त्रिषु यच्चिदाकाशं तद्इतरद्वाभ्यां शून्यतरमत्यंत सूक्ष्मं विद्धि॥ अथवाका
शं च महत्तृतीयकमिति अयाख्यत उच्यते॥ द्वाभ्यां शून्यतरमित्यनेन ब्रह्मणो निःप्रपंचत्वमुक्तं। चित्ताव्याकृतातिरिक्तप्रपंचाभावात्॥

राम
१८
६६

देशादिति॥ संविदश्चित्तस्य देशाद्देशांतरप्राप्तौ विषयाद्विषयांतरप्राप्तौ सत्यां निमेषेणात्यल्पकाले न प्रतीयमानं यन्मध्यमस्ति
तदेव चिदाकाशं विद्धि जानीहि॥ एतदुक्तं भवति। चित्तस्य पूर्ववृत्तौ नष्टायामुत्तरवृत्तौ भविष्यंत्यां मध्ये यन्निर्विषयं संधिसाक्षिभूतं चै
तन्यस्वरूपं प्रकाशं तद्वृत्त्योर्मध्ये प्रतीयमानत्वान्मध्यमित्युच्यमानं तच्चिदाकाशं विद्धीति। तथा च सप्तभूमिकानिरूपणावसरे वसि
ति॥ अर्थादर्थांतरं चित्ते याति मध्ये तु या स्थितिः। निरस्तमननाकासौ स्वरूपस्थितिरुच्यत इति। उक्तं च महद्भिः संध्यायोः खिलवृत्तीनां

देशाद्देशांतरं सौ संविदो मध्यमेव यत्॥ निमेषेण चिदाकाशं तद्विद्धि वरवर्णिनि॥ तस्मिन्निरस्तनिःशेषसंकल्पास्थितिमे
षि चेत्॥ सर्वात्मकं पदं शांतं तदा प्राप्नोष्यसंशयं॥ अत्यंताभावसंपत्त्या जगतस्त्वं तदात्मने॥ नान्यथा मद्वरेणाशु त्वं तु
प्राप्स्यसि सुंदरि॥

प्रभावाद्भवावभासिताः। निर्विकारेणापि नासौ क्रूरदृश्य इति गीयत इति एवं ब्रह्मात्मत्वं प्रतिपाद्य तद्विषयं योगं तत्फलं वा
हा तस्मिन्निति॥ निरस्तो निःशेषो निरवशेषः संकल्पो नानाप्रत्ययलक्षणो यया सा तथोक्ता एषि गच्छसि। इणं गतावितिस्म
तो लिणमध्यमपुरुषैकवचनं॥ प्राप्नोष्यवगतिप्राप्तिद्वारा मुक्ता भवस इत्यर्थः॥ तथा चोक्तं। इंद्रियाणि हीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि
एकीकृत्य विमुच्येत योगोयं मुख्य उच्यत इति॥ यदा सर्वाणि भूतानि समाधिस्थो न पश्यति। एकीभूतः परेणासौ तदा भवति
केवल इति च

सर्वात्मकपदप्राप्त्युपायमाह॥ अत्यंताभावसंपत्त्येति। जगतोऽत्यंताभावसंपत्त्यात्यंतासत्त्वनिश्चयेनेति यावत्॥ एतत्सर्वा
त्मकं पदं॥ मद्वरेणा शिवत्यादयो यथापत्तुरित्यंताः श्लोकाग्रंथाः स्पष्टार्थाः॥ कश्चित्किंचिद्व्याख्यायते॥ तस्मिन्नेवालयांबरे

अत्यंताभावसंपत्त्या जगतस्त्वेतदाप्यते॥ नान्यथा सद्वरेणास्तु त्वं तु प्राप्स्यसि सुंदरि॥ वसिष्ठ उवाच॥ इत्युक्त्वा सा ययौ
देवी धिष्ण्यमात्मीयमास्पदं॥ लीला तु लीलयैवासीन्निर्विकल्पसमाधिभाक्॥ तत्याज्ञाथ निमेषेण सांतःकरणपंज
रं॥ स्वदेहं खमिवोड्डीना मुक्तक्रीडाविहंगमी॥ ददर्श खस्था भर्तारं तस्मिन्नेवावरालये॥ संस्थितं पृथिवीपालमास्थाने
बहुराजके॥ सिंहासनसमारूढं जयजीवेति संस्तुतं॥ पूर्वद्वारस्थितासंख्यमुनिविप्रर्षिमंडलं॥ पश्चिमद्वारगाशेषराजरा
जेशमंडलं॥ उत्तरद्वारगासंख्यरथहस्त्यश्वसंकुलं॥ दक्षिणद्वारगासंख्यललनालोकसंकुलं॥ पपालाथ महारंभा
सा तां नरपतेः सभां॥ तद्देशांस्तत्सभाचारांस्तथा तानेव बालकान्॥ अथान्यान्प्रपूर्वांश्च पंडितान्सुहृदस्तथा॥ म
हानदनदीशैलपुरपत्तनमंडितान्॥ द्विरष्टवर्षभूपालं प्राक्तनाकारसोक्षितं॥ सर्वमालोक्य सा राज्ञी विस्मयं पर
मं ययौ॥ अथासुत्याय सा राज्ञी निजांतःपुरमागता॥ देवीं सस्मार विज्ञप्तिं ददर्श वपुरःस्थितां॥ भद्रासनगतां देवीं ली
लापृच्छद्विस्मिता॥ ॥

खएव गृहाकाश इत्यर्थः। जीवेति क्रियापदं॥ पपात जगाम तद्गृहे लीलया प्रागनुभूतदेशादयः परा
मृश्यंते॥ तालकावर्दिनः पुरं शाखानगरं पत्तनं मूलनगरं। राजधानीत्यर्थः॥ भद्रासनगतं। सिंहासनगतं॥ नृपासनं यत्तद्भद्रासनं
सिंहासनं तु तदित्यमरः। शुभासनगतमिति वा॥

पद्मरूपेणमरणानंतरं द्रष्टाएवतस्मिन्नेवगृहेकोशेहृदस्यप्रपंचांतरस्योत्पन्नत्वमुचितदेशकालसाधनाद्यभावात्।स्वप्नप्रपं
चवन्मिथ्यात्वंनिश्चित्यंतदृष्टांतेनसंभावितस्यजगन्मिथ्यात्वस्यनिश्चयायप्रश्नः।प्रपंचांतरभ्रमकारणंयथेत्यादिश्लोकेनपृच्छ
तितद्भ्रमकारणेकिंविदितेतत्कारणकस्यसर्वस्यापिजगतोमिथ्यात्वंनिश्चेतुंशक्यतइतिमूर्त्तेर्मूर्छितावयवस्सन्नभवतीत्यमू
र्त्तः।अमूर्त्तत्वेहेतुः।भ्रमात्मकइति।अस्मात्सर्गादित्यइत्यध्याहार्यं।सर्वोयंप्रपंचोभ्रमात्मकएवतत्रैश्वर्यभ्रमादुत्तरोत्तरभ्रमो

यथापद्मजमूर्त्तेरस्मात्सर्गात्सर्गोभ्रमात्मकः॥ जातस्तथाकथयमेजगद्भ्रमनिवृत्तये॥ श्रीदेव्युवाच॥ प्राक्स्मृतंतेमयाप्रीति
मात्राभासत्रयमुदितोयथा॥ तथाद्वितीयःप्रश्नस्तेयथैतत्कथ्यतेशृणु॥ अस्तिकश्चिच्चिदाकाशेकश्चित्संसारमंड
पः॥ आकाशविशदःकाचदलसंछादिताकृतिः॥

पप्रत्निरितिसिद्धांतेनस्वसुर्भर्तृणाप्राक्तनप्रपंचभ्रमोयथापूर्वजन्मचिंतातद्भवितःतथामरणानंतरभाविप्रपंचभ्रमोपि
पूर्वजन्मभावनायाउत्पन्नइत्युत्तरमाह॥ प्रागिति॥ दृष्टांतएवासंप्रतिपन्नइत्याशंक्याह यथेतदिति॥ यथैतत्स्पष्टंभवति
तथाकथ्यते॥ पद्मलीलयोस्सर्गांतरेब्राह्मणदंपतितयापूर्वमवस्थानादिकंदर्शयितुंतदीयंपूर्वसंसारंजीर्णमंडपतया
वर्णयतिहेयत्वाय॥ अस्तिकश्चिदित्यादिनासंछाद्यतेनेनेतिसंछादनंआकाशोसेवनीलत्वात्कोमलदलात्मकसंछादनंतेना
छादिताकृतिराकारोयस्यसतथा॥ ॥ ॥

मेरुरेवस्तंभस्थायालोकेशानामिंद्रादीनांपुरंध्रः कुड्यविन्यस्ताएवसालभंजिका पुत्तलिकायस्यसतथा। मंडपच्छिरकालस्थोवल्मीकज्वालालोष्टको भवति। तथा संसारमंडपोपि कोणस्थभूतवल्मीकज्वालापर्वतलोष्टकः। लोष्टः पांसुपिंडः पर्वतको गोष्ठुस्थिता॥ ज्वालिनोभूतशब्देनोच्यंते। पर्वताएवलोष्टानि कोणस्थभूतान्येववल्मीकानितैर्ज्वालामानिपर्वतलोष्टानि यस्मिन् सतथा॥ अथ कोणस्थभूतवल्मीकज्वालामानिपर्वतलोष्टानियस्यसतथोक्तः॥ जरवोजरायुजकाः अनेकेपुत्रा मरीच्याद्यो यस्यसोनेकपुत्रः॥ अनेकपुत्रोजटरश्चयःप्रजेशोब्रह्मणस्तस्यास्यदंष्ट्रानांमंडपोत्पुर्द्धभागेतिर्यगायतमहावंशस्थितकीटकोभवति॥ तथासंसारमंडपोपीत्याह॥

मेरुस्तंभस्थलोकेशसुरश्रीशालभंजिकाः॥ कोणस्थभूतवल्मीकज्वालापर्वतलोष्टकः॥ अनेकपुत्रजरठप्रजेशब्राह्मणास्य
दंष्ट्रातमार्गमहावंशस्थितवैमानिकीटकः॥ नमोनिवासिसिद्धौघमशकाहितघुंघुमः॥ सुरासुरादिडिंबालिलीलाकलकलाः
कुलः॥ तत्रकस्मिंश्चिदेकस्मिन्कोणापवरकोदरे॥ शैललोष्टतलेस्तेकोगिरिग्रामकार्तकः॥ ॥ ॥

वातेति॥ मेघमार्गसौरमार्गयोर्मध्येवातमार्गः प्रसिद्धः॥ यंमार्गमासाद्य भीमसेनेनप्रक्षिप्ताअनेकसहस्रगजास्तूनायतेस्म॥ वैमानिनो वैमानगामिनस्तएवकीटावालमार्गाएवमहावंशस्तस्मिन्स्थितावैमानिकीटायस्यसतथा॥ नमोनिवासिसिद्धौघाएवमशकोस्तैराहितकृतोघुंघुमामध्वनिःयस्मिन्सतथा॥ सुरासुरादयएवडिंबालाडिंबालास्तेषांलीलाकलकलेनलीलाकोलाहलेनाकुलः॥ तत्रकस्मिंश्चिदित्यादिरेषतेकथितइत्यर्थः। श्लोकनोयंग्रंथसंदर्भःस्पष्टार्थः। तत्रकानिचित्पदानिविविच्यंते। अपवरकंगर्भागारः शैललोष्टतलेपर्वतलोष्टाधःगिरिग्रामइतिग्रामनामसवग्रामःपर्वतस्यनिम्नप्रदेशस्थइतिदर्शयितुंगर्तकशब्दः॥ ॥ ॥ श्रीगोपालायनमः

उपगूढ॰ आलिंगिते ।। वसिष्ठस्येवसदृश इत्यत्रैव षष्ठ्योऽवक्षरयो । वसिष्ठस्यसदृशएव नउवासिष्ठ चेतनः ।। नैववसिष्ठसंबंधीतीवः प्रसिद्धवसिष्ठादन्यएवेत्यर्थः ।। वसिष्ठइतिनाम्नासौविख्यातइतिशेषः । शारलशाद्वलेशारलैः प्रतिकाष्ठशारम्पदृढैः शाद्वले हरितेपीतदुःशारलःप्रतिकाष्ठवेत्यमरः ।। यद्यपिमा

तस्मिन्नदीशैलवनोपगूढे सान्निध्यसदाश्रुतवातरोगः । गोक्षीरवानराजभपा नभिज्ञः सर्वातिथिधर्मपरोद्विजोभूत । वित्ते वेषवयः कर्म्मविद्याविभवचेष्टितैः । वसिष्ठस्येवसदृशोनउवासिष्ठचेतनः । वसिष्ठइतिनाम्नासौतस्याभ्यदिंदुसुंदरी । नाम्नात्वरुंधतीभार्याभूमिव्योमन्यरुंधती । वित्तवेषवयः कर्मविद्याविभवचेष्टितैः । समेवसाप्यरुंधत्यानउवैतन्यवत्तया । सचिप्रसक्तस्यशैलस्यसानोसरलसाद्वले । कदाचिडपविष्टः सनददर्शाक्षेमहीपतिं । समग्रपरिवारेणायातमाखेटकेच्छया । तमालोक्यमहीपालमिदंचिंतितवानसौ ।। ।।

इलंघ्याद्दहरितइतिशादेनशष्पेनहरितेननीलेदेशेशा । इलशाद्देमाहासरः ।। पाणिनिरपिशाद्वोऽस्मिन्प्रदेशइत्येवमर्थेनडशादोड्वलचंत्ययमाह ।। तथापितस्यात्रासंभवातशाद्वलशब्देनहरितत्वमेवविवक्षितं आखेटोमृगया ।। ।। ।। ।।

हिममेवांभोजनाशकत्वाद्दशनिर्हिमाशनिः पंचत्वं मरणं स्यात्त्यं चतां कालधर्मो दिष्टांतः प्रलयो त्ययः इत्यमरः ॥ जीवाकाशतया जीव एव स्वच्छ

अहो नु रम्या नृपता सर्वसौभाग्यलालिता ॥ कदाष्टपां दश दिक्कुंजरस्कोहं महीपतिः ॥ पदातिरथहस्त्यश्वपताकाछत्रचामरैः ॥ कदा मे वा
यवः कुंदमकरंदसुगंधयः ॥ पास्यंत्यंतःपुरस्त्रीणां सुरतश्रमशीकरान् ॥ इत्थं ततः प्रभृत्येव विप्रः संकल्पवानभूत् ॥ स्वधर्मनि
रतो नित्यं यावज्जीवमतंद्रितः ॥ हिमाशनिरिवांभोजं जरीकर्तुमनाहतः ॥ तं तथाचिंतयाविष्टं जरद्विजमुपाययौ ॥ आसन्नमरणा सा
स्य भार्या ग्लानिमुपागता ॥ मा मद्याराधितवती सा तत स्वामिवांगते ॥ अमरत्वं प्रभुं पापं बुद्ध्वा संसाहणो ह्यं ॥ देविस्वमंडपादे
वजीवो भर्तृर्मृतस्य मे ॥ मायासीदित्यतस्तस्याः स एवांगीकृतो मया ॥ अथ कालवशाद्विप्रः स पंचत्वमुपाययौ ॥ तस्मिन्नेव गृ
हाकाशे जीवाकाशतया स्थितः ॥ संपन्नः प्राक्तनानल्पसंकल्पवशतः स्वयं ॥ आकाशवपुरेवोर्वीपतिः परमशक्तिमान् ॥ ॥

त्वस्य सत्वादिनाकाशकल्पत्वादाकाशस्त स्वभावमनुनात तयासंपन्न इति स्वयमाकाशवपुरेव सन् प्राक्तनानल्पसंकल्पवशतः परमशक्ति
मानुर्वीपतिः संपन्न इत्यन्वयः ॥ ॥

कंदरोदरी। दरी तु कंदरो वा स्त्री त्यमरः॥ स ते भर्त्रेति॥ स द्विजो भूपत्वमागतः संन्नघते। भर्त्रा संपन्न इत्यन्वयः॥ शिवौ पार्वती परमेश्वरौ॥ तर्हि ष
यो आरूढः संसार सत्य इति शंका निरसनेनोपसंहरंती फलितमाह॥ एष इति॥ भ्रांतिमात्रकं इति विशेष्यमाकाशमिति विशेषणायःस

तस्मिन्न विप्रे शवीभूते शोकेनार्त्यं तकर्शिता॥ सा तस्य ब्राह्मणी भार्या हृदये न द्विधागमत॥ भर्त्रा॥ सह शवीभूता देहमुत्सृज्य
हृतः॥ आतिवाहिकदेहेन सा भर्त्तारमुपाययौ॥ तत्रास्य विप्रस्य सुता गृहाणि भूस्थावरादीनि धनानि संति॥ अद्याष्टमं
ति॥ अद्याष्टमं वासरमासस्थो जीवो गिरिग्रामककंदरस्थः॥ देव्युवाच॥ स ते भर्त्ता द्विसंपन्नो द्विजो भूपत्वमागतः॥
यासावरुंधती नाम्ना ब्राह्मणी सा त्वसंगते॥ इह भो कुरुतो राज्यं तौ भवंतौ सुदंपती॥ चक्रवाकाविव नवौ भुवं जातौ शि
वाविव॥ एष ते कथितः सर्गः प्राक्तनासंस्मृति भ्रमः॥ भ्रांतिमात्रकमाकाशमेवं सर्वं हि भासते॥ लीलोवाच॥ देवि त्वद्
वचनं मिथ्या कथं संपन्नमीदृशा क्व च विप्रजीवः स्वगृहे क्व मावा वाम्मिह स्थितौ ॥ ॥ ॥

र्गोवभासते स एव मुक्तेन न्यायेनाकाशमर्थशून्यं भ्रांतिमात्रकं हीत्यन्वयः॥ अनन्वितार्थतयोक्तमाक्षिपति॥ देवि त्वद्वचनमि
त्यादिना॥ ॥

अमी वयं यत्र देशांतरादिद्धिदानीमास्महे तो दक्षदेशांतराद्यो वसिष्ठविप्रगृहस्यांतः कथं मातिन कथमपीत्यर्थः ।। वसिष्ठ
विप्रदेशापेक्षयांतरं स्याहः कथं मंतिगृहस्यांतमाडर्मायेघवस्थित इति। क्वचित। ऐरावणाऐरावतः ऐरावतोऽत्र मातंगाराज्वणा त्वम
वस्त्राभाइत्समरः ॥ ईश्वर्यमिम परमात्मा मत्वा परिज्ञानविलसितमिदं चोद्यमित्यभिप्रायेणापरिहरति ।। नाहंमिथ्या वदामि इत्या

ताहृग्लोकांतरं साध्वस्ते शैलास्ता दिशो दश ।। कथं मांतिगृहस्यांतर्यत्रामी वयमास्महे ।। मत्तऐरावणो बद्धः सर्षपाकोणको
टरे ।। मशकेनकृतं युद्धं सिंहौघैरणुकोटरे ।। पद्माक्षेस्थापितो मेरुर्निगीर्णो भृंगसूनुना ।। असमंजसमेवैतद्यथेमं देवि ताहृ
शं ।। देव्युवाच ।। नाहं मिथ्या वदामीदं यथावच्छृणु सुंदरी ।। भेदनैनियतीनां हि क्रियते नास्मदादिभिः ।। संग्रामद्विजजीवा
त्मा तस्मिन्नेव स्वसद्मनि ।। व्योमैवेदं महीराष्ट्रं व्योमात्मैव प्रपश्यति ।। ||

दिना ।। नियतीनां जगन्मर्यादानां ग्रामद्विजजीवात्मा गिरियाम ब्राह्मणजीवात्माद्यो मात्मचित्र शरीराः चिताकाश चिदाकाश
मितिहि पूर्वमुक्तं अथवा व्योमात्मानिराकाराः ।। व्योमैवेदं महीराष्ट्रं निस्वरूपमेवेदं महीसहितराष्ट्रं स्वप्नदृग्वपश्यति ।। १ ।।

ननु तद्वद्विघोष्पूर्वसंसारविषयास्मृतिः कुतो नानुवर्त्तते कुत इयं तद्विपरीत घव्हति रुदितेत्यत आह। घ्राक्षनीति। जागरेऽनुभूतपदा
र्थविषयास्मृतिः। स्वप्नावस्थायां यथा न जायतेऽन्यथाप्रतीतिश्च जायते॥ तथा पूर्वजन्मन्यनुभूतपदार्थविषयास्मृतिरस्मि
न्लुप्ता भवति नानुवर्त्तते। पूर्वजन्मभावनाविशेषादन्यथा घती तिस्रवोत्पद्यते स्म एतन्मरणं तत्र कारणमिति शेषः। मरणं हि सं
स्कारलक्षणां स्मृतिबीजं विप्रमज्जति अतः स्मृतिर्नानुवर्त्तत इति भावः॥ कथमां तिग्रहस्यांतशितिचोद्यपरिहारं विशदयति इयमि
तिसत्यतयावाभासोयस्य स सत्यावभासस्तस्य विच्छिन्नः परमात्माकाशस्य कोशो जीवस्त्वोपाधिभूतमंतःकरणं तस्य कोटरे

घ्राक्षनी सा स्मृतिर्लुप्ता युव यो रुदितान्यथा॥ स्वप्ने जाग्रत्स्मृतिर्यद्वद्देहे तन्मरणसंगमे॥ इयमंतःस्थिता भूमिः संकल्पाद
र्थयेरिव॥ तस्य सत्यावभासस्य विच्छिन्नः कोशकोठरे॥ परमाणौ परमाणौ संति वत्से चिदात्मनि॥ अंतरंतर्जगंतीति पवि
भानात्मकान्युता

म्यंतरेतन्नाप्यंतरिपंभूमिः सशैलवनकानना स्थिता संकल्पशद्देन मनोराज्यं कुर्वतः पुंसः कसंकल्पोगृह्यते। अथवांतस्थिता मनसि स्थिता।
अस्मिन्पक्षे तस्येत्यादेरूपरिसंबंधः। जगदंतर्वर्त्तत इत्येतत्। कथिदेवनसर्वत्रेति नमंतव्यमित्याह। परमाणाविति चिदात्मनि ब्रह्मणि परमा
णोपनमाणौ प्रतिजीवे परमसूक्ष्मांतःकरणोपहितत्वाज्जीवस्य परमाणुत्वं वालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञे
य इति श्रुतेः। अंतरंतः प्रतिभामात्रकाणीति जगंत्येवंविधानि जगंति संति॥ संसारस्यानादित्वात्॥ दृष्टेरेव स्वच्छित्वा स्वप्नावस्थायाम तिस्व
च्छानाडीगत तयाणुकल्पजीवेंतरंतर्जगतां दर्शनाच्च प्रतिजीवं मंतरंतर्जगति संतीत्युपपन्नमुक्तं॥ ॥ राम॥

यो॰टी॰
२४

अष्टमे दिवस इत्यादिश्लोकत्रयं स्पष्टार्थं। विद्धि लासैकरूपिणि शिवविवर्त्तैकस्वरूपात् ॥ कथं तर्हि प्रतिभासद्वितभ्रांतिक्रम इति तत्राह॥ यथावदित्यादि मरणाद्यारम्भमूर्छनामरणमूर्छनातां। चिदात्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वपरिज्ञानमात्मनआवेदयंत्याह॥ अहो इति। एवमा

लीलोवाच॥ अष्टमे दिवसे विप्रः समृतः परमेश्वरि॥ गतो वर्षगणोऽस्माकं मातः कथमिदं भवेत् देव्युवाच॥ देशदैर्घ्यं यथा नास्तिका
लदैर्घ्यं तथांगने॥ प्रतिभामात्रकं ह्यन्यद्विद्धि लासैकरूपिणि॥ यथावस्तु प्रतिभासस्य वसे क्रममिमं शृणु॥ अनुभूय क्षणं जीवो मिथ्या
मरणमूर्छनां॥ विस्मृत्य प्राक्तनं भावमन्यं पश्यति सुव्रते॥ आधेयो हि महाधारे स्थितोऽहमिति सुंदरि॥ हस्तपादादिमान्देहो ममाय
मिति पश्यति॥ एतस्याहं पितुः पुत्रो वर्षाण्येतानि संस्थिते॥ इमे मे बांधवा रम्या ममेदं रम्यमास्पदं॥ इति भाति जगत्यत्र स्मृतिमोहाद
नंतरं॥ लीलोवाच॥ अहो नु परमा दृष्टिर्दर्शिता देवि मेऽनया॥ इदानीमहमेतस्यां यावत्परिणता दृशि॥ नाभ्यासेन विना तावद्विश्री
द्दं देवि कौतुकं॥ सर्गब्राह्मणदंपत्योर्स्तं मानय महेश्वरि॥ ॥

मोक्त्वा प्रपंचमिथ्यात्वं विज्ञाय उक्तार्थप्रत्यक्षीकरणादिना तद्दार्ढ्यार्थं प्रयतते लीले दानीमिति। अभ्यासेन विनैतस्यां दृशि दृष्टा विदानीया
वत्परिणता पक्वा प्रौढा तत्र विश्रामितावदिदं कौतुकं कुतूहलं मिं धि विदारय॥ स्त्रज्पत इति सर्गं॥ प्रपंचस्तं सर्गं नेतुं समर्था विमित्याह महे
श्वरीति॥ ॥

राम
२४
७१

लीलायाः स्थूलशरीरेणासर्गांतरगमनकारणं कर्मापश्यंती भगवती ब्रह्मविद्यादानं व्यपंतदीयंपुण्यपुंजमाकलयतदनुरूपमाह। अ
चैत्येत्यादिवेत्याद्युपाशाद्यादयो नविद्यंतेयस्मिंस्तद्चैत्यचिद्रूपं तन्मयी तस्य भातां तद्विषयामितियावत्॥ द्युपमवगतिं सहसंभूय।
अनर्गलमवाप्यं॥ अथवातर्गलमप्रतिबंधकं यथातथापश्यावः। ननु स्थूलशरीरस्य सर्गांतरदर्शनद्वारभूतगमनप्रतिबंधकत्वं कुतइ
त्याशंक्याह जगंतीति॥ मूर्तानि मूर्छितावयवानि भवंतीत्यमूर्तानीमानि जगंति॥ भवद्भिरजैर्जीवैर्बुध्यन्ते हाद्य यथाभिनिवेशान्मूर्ति

देह्युवाच॥ अचैत्यचिद्रूपमयी परमां धावतीदृशं॥ अवलंब्य समाकारमवबुध्यभवामला॥ एवं स्थिते तं पश्यावः सहसा समत
र्गलं॥ अयं तद्दर्शनद्वारे देहस्तव महार्गला॥ जगंतीमान्यमूर्तानि मूर्तिमंति स्थिरधाय्यहाद्य॥ भवद्भिरवबुध्यंति हेमानीवोर्मिका धिया॥ ॥

मंत्यवयवमूर्छतवंत्यवबुद्धानि॥ यथाज्ञःसूर्छंतमूर्छितवमूर्तिरिति। तत्वविपरीतग्रहणो दृष्टांतमाह॥ हेमानीति॥ ऊर्मिका धियां गु
लीयकबुद्ध्या अंगुलीयमूर्मिकेत्यमरः॥ नहि हेम्न ऊर्मिका त्वं निपुणतरं बहुधापरीक्षमाणसंस्थानविशेषापन्नेभ्यस्तेभ्योव्यति
रिक्तमुपलभ्यते॥ अतस्तानि यथोर्मिकाबुद्ध्या स्वर्णैर्विपरीतग्रहीतानि तथा निराकाराण्यपि जगंति साकारतयाभ्रांतिगृहीतानि॥
तस्मान्मूर्तस्य शरीरस्य मूर्तांतरेणाप्रतिरोधात्॥ प्रपंचांतरदर्शनद्वारभूतगमनेर्गलत्वं युक्तं॥ ॥

नकेवलं देहः सर्गांतरदर्शनद्वारप्रतिबंधकस्तत्वज्ञानप्रतिबंधकश्चेत्याह । तचेति ॥ तदाकार आकृतिर्वक्ष्यमाणज्ञानाभ्यासं विना
ब्रह्मणामधिष्ठानभूतब्रह्मत्वं न गतः ॥ अधिष्ठानब्रह्मव्यतिरेकेण सन्निहितिनं निश्चिवतइति यावत् ॥ कलनरूपात्मास्थितः कलन
रूपं कल्पनाश्वरूपं तदेवात्मा शरीररूपं यस्य स तथा तेन कारणेन नानुपश्यसि तद्ब्रह्मेति शेषः ॥ तथा चोक्तं वृहद्वासिष्ठे ॥ यावदभ्या
सयोगेन न जातान्तेदक्षास्तवानघ । नंतावदतद्रूपं न ब्रह्मपरिपश्यसीति ॥ तर्हि भवत्सन्निभूतिभिः प्रतिबंधके शरीरादिस्त्र मे स्थिते क
थं तद्ब्रह्मानुभूयत इत्याशंक्याह । तत्रेति ॥ यदृशे मम दादधोर्ब्रह्मसंवित्तेर्ब्रह्मज्ञानस्याभ्यासात् ज्ञानाभ्यासे नृदिधमुपयाता

तावाभ्यासं विना बालेनाकारो ब्रह्मतां गतः ॥ स्थितः कलनरूपात्मा तेन त्वं नाउपश्यसि । तत्र वृद्धिमुपायातायद्र मे त्वस्मदादयः अ
भ्यासाद्ब्रह्मसंवित्तेः पश्यामस्तेहितत्यदं ॥ आतिवाहिक एवायं वादृशो विविद्धदेहकः । आधिभौतिकया बुद्ध्या गृहीतश्चिरभावनात्

प्रसिद्धिमुपागतस्त्वेव यहितस्मात्तत्ज्ञेयं पश्यामोऽनुभवामः अयमभिप्रायः । ब्रह्मज्ञानाभ्यासपरिपाकादेहाद्यात्मत्वभ्रमकार
णाभूतवासनालये प्रतिबंधकाभावादस्मदादिभिर्ब्रह्मात्मतत्वं करामलकवदनुभूयत इति ॥ देहस्य कलनरूपत्वमसिद्धमित्याशंक्या
ह । आतिवाहिक इति । अतिवाह्यते तं तं देशमप्रतिहतया गत्या नीयत इत्यतिवाहिकस्तत्संबिद्धदेहकः आतिवाहिक एव स्तस्स एव
स वत्स्वादृशैरज्ञैश्चिरकालविपरीतभावनादाधिभौतिकया आधिभौतिकोऽयमित्येवमाकारया बुद्ध्या गृहीतः ॥ ॥

तर्ह्यातिवाहिकता सहजापि त्वद्देहं कदायास्यतीत्यत आह ॥ वासनेति ॥ ज्ञानाभ्यासेन वासनातानवं द्वैतवासनाल्पत्वं यदा
ते नूनं स्थितिमेष्यति तदा देहके चिन्मद्देहके आतिवाहिको भावः अतिवाहिकभावः सूक्ष्मभाव इत्यर्थः पुनरेष्यत्यायास्यति
ननु कथं विशदयति ॥ शुद्धेति ॥ शुद्धसत्त्वानुपतितं रजस्तमोभ्यामनभिभूतं सत्त्वगुणानुगतं अयमर्थः स्वप्नदशायामिव जागरेपि
शरीरादिप्रपंचरूपेण विवर्त्तमानं चित्तं ज्ञानाभ्यासाद्वासनातानवे सति शरीरादिरूपतां विहाय प्रतिभासमात्रात्मकं स्वीय

वासनातानवं नूनं यदा ते स्थितिमेष्यति ॥ तदातिवाहिको भावः पुनरेष्यति देहके ॥ शुद्धसत्त्वानुपतितं चेतः प्रतनु
वासनं ॥ आतिवाहिकतामेति हिमं तापादिवाम्बुतां ॥ वासनातानवे तस्मात्कुरु यत्नमनिंदिते ॥ तस्मिन्दृढोभ्युपायो
ते जीवन्मुक्ता भविष्यसि ॥

सूक्ष्मं रूपतामेति ॥ अत एव जीवन्मुक्तिदशायां प्रातिभासिकं जगदित्याचक्षिरे ॥ यतो वासनातानवे सति चेतसः स्थीनत्वं वि
लीयते ॥ तस्मात्तत्सिद्धये ज्ञानाभ्यासलक्षणो यत्न आस्थेय इत्याह ॥ वासनेति ॥ वासनातानवे प्रभूते सति न केवलं चे
तसः स्थीनत्वं विलीयते किंतु भवपर्यंतज्ञानोदयाद्बंधोपि विलीयत इत्याह ॥ तस्मिन्निति ॥

एवं ज्ञानपरिपूर्त्त्युपायमभिधाय तत्परिपूर्त्तेः प्राक् पूर्वसर्गदर्शनाय पद्मकर्त्तव्यं तस्मारयति। यावदिति। न तु बोधो यावन्न पूरित
स्तावत्तत्स्थूलदेहमिह संस्थाप्य अपरं वान्तरमेवेक्षतामिति वदन्त्या शरीरेणैव देहस्थापनं विनैव प्रपञ्चान्तरदर्शनमभ्युज्ञात
मिति प्रतीयते। तत्रोपपद्यते। पूर्णबोधादाकाशगमनादेः स्वदयेन तेनैव शरीरेण सर्गान्तरदर्शनासंभवात् पूर्णज्ञानायैव अपि ह
ठलाया आकाशगमनं सिद्धिसिद्ध्यर्थः प्रयत्नान्तरास्थानदर्शनाच्चेत्प्रसेद्धः। ज्ञानमार्गो लीलाया आदरातिशयोत्पादना

यावन्नपूरितस्त्वेष शीतलो बोधचन्द्रमाः॥ तावद्देहमवस्थाप्य सर्गान्तरमवेक्षताम्॥ लीलोवाच॥ अत्रोपकुरु मे ब्रूहि कोऽ
भ्यासः कीदृशोऽथवा॥ स कथं पोषमायाति पुष्टे तस्मिन्भवेत्किम्॥ देव्युवाच॥ तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबो
धनं एतदेकपरत्वं च तदभ्यासं विदुर्बुधाः॥ ॥

ग्रन्थाभिधानात्तत्त्वाभ्यासं विना वालेनाकारो ब्रह्मतां गतं इत्यादिनोक्तस्य बोधपूरकत्ता नाभ्यासस्य स्वरूपं तत्प्रकारं तत्प
रिपाकहेतुं तत्परिपालकफलं च क्रमेण पृच्छति। अत्रेति। अत्र बोधपूरणे योऽभ्यासस्तं उपकुरु तेनास्मत्कुरु इति योजना। तत्राभ्या
सस्वरूपमाह॥ तच्चिन्तनमिति तस्य ब्रह्मणो गुरुतः श्रुतस्य चिन्तनं युक्तितः पर्यालोचनं। तस्यान्यस्मै शिष्याद्गुणसंपन्नाय
कथनं तत्कथन

एतदेकपरत्वमिति।निदिध्यासनमुक्तंकीदृशोभ्यासइतिप्रश्नस्योत्तरमभिप्रेत्याह।उदितेति।।उदितमौदार्येणमहत्वेनसौंदर्यंय
स्यांसा।।उदितौदार्यसौंदर्यवैराग्यपरसोवैराग्यसारोगर्भेत्वर्यस्यास्तात्तथोक्ता।।उदितौदार्यसौंदर्यावासौवैराग्यरसगर्भिणीचेतित
था।आनंदस्यंदिनीआनंदवर्षिणीपरेपरमात्मनि।।मंदमध्यमाधिकारिणोज्ञानाभ्यासक्रमेणश्लोकद्वयेनाह।।अत्यंतेत्यादि।
ना।अथवाकीदृशइतिप्रश्नस्योत्तरमभिप्रेत्यैतदपिश्लोकद्वयमाह।।अत्यंतेति ज्ञेयस्यवस्तुनोरूपपदार्थस्यइदंजगदहंचे
रूपसगर्भोसदृशौवस्तुनोत्यन्तमेवा।तस्तद्रूपंसदानास्तित्याभ्यासंपरेपरमात्मनिविषयेबोधाभ्यासविदः।उदितौदार्यसौ

उदितौदार्यसौंदर्यवैराग्यपरसगर्भिणी।।आनंदस्यंदिनीयेषांमतिस्तेभ्यासिनःपरे।।असत्तांभावसंपन्नौ[illegible]यस्यवस्तु
नः।।शुक्राशास्त्रैर्यतंतेयेतेब्रह्माभ्यासिनःस्थिराः।।सर्वदावेवनोत्यन्नंदृश्यंनास्त्येवतत्सदा।।इदंजगदहंचेतिबोधा
भ्यासंविदुःपरे।।रूपासंभवबोधोहि[illegible]कथ्यते।।तदभ्यासेननिर्वाणमित्यभ्यासोमहोदयः।। ।। ।। ।।

दृश्यत्यनेनोक्ताद्दृष्टविदितप्रपंचमिथ्यात्वान्निःप्रपंचेब्रह्मानंदेनिमग्नचित्ताउत्तमाःरूपमिथ्यात्वंपरिज्ञायातदाद्यायप्रय
तमानामध्यमाः।।जगन्मिथ्यात्वंपरिज्ञातुंशास्त्रयुक्तिभ्यांप्रयतमानाअधमाइतिविवेकः।।सकथंपोषमायातीत्यस्योत्तरेम
हद्रूपेति।।रूपंदृष्टरिकालत्रयेपिनसंभवतीतिबोधेनरागद्वेषलोभादीतांतानवेकशत्वेसतिबलोदिताभ्यासबलेनाभिव्य
क्तापासौरतिर्ब्रह्मानंदलक्षणांसब्रह्माभ्यासपरिपक्वब्रह्मज्ञानाभ्यासउच्यतइतियावत्।। ।।

दृश्यासंभववोधमस्यापरिपाकहेतुं स्तुवन्सुष्टितास्मिंश्चकिंभवेदितिप्रश्नस्योत्तरमाह । दृश्यासंभववोधोहीति । तदभ्यासेनतस्य
दृश्यस्याभ्यासः भववोधस्याभ्यासस्तेनतत्पूर्वकब्रह्मज्ञानाभ्यासपरिपाकेनेतियावत् ॥ अपरोक्षज्ञानप्राप्त्यानिर्वाणांकैवल्यं
भवति । महानुदयऐश्वर्यंब्रह्मानंदप्राप्तिलक्षणंयस्मादभ्यासात्समहोदयः इतिसंकथनमित्यादयएकार्थावमिवोद्भूत

दृश्यासंभववोधेनरागद्वेषादितानवे । रतिर्बलोदितायासौब्रह्माभ्यासःसउच्यते ॥ वसिष्ठउवाच ॥ इतिसंकथनंश्रु
त्वातस्यांनिशिवरांगने । समाधिस्थानकंकृत्वातस्थतुर्निश्चलांगकौ ॥ निर्विकल्पसमाधानाज्झटितिपूर्वसंविदं ॥
तेनैवज्ञानदेहेनचचारज्ञप्तिदेवता । मानुषीमानुषंदेहंत्यक्त्वाब्रामसातदा । देहांतरेचप्रादेशमात्रमानुषसंवि
दा ॥ वभूवतुश्चिदाकाशरूपिण्योव्योमयाकृती ॥

मित्यतःक्वप्राकृताग्रंथास्पष्टार्थाः । कचिंकिंचिद्विविच्यते । जहतुःविससर्जतुःपूर्वसंविदंसमाधेःपूर्वकालंज्ञानमह
मित्येवमाकारं । ज्ञानदेहेनज्ञानप्रधानदेहेन । संविदासंकल्पेन । चिदाकाशरूपिण्योब्रह्माकाशरूपिण्योव्योमगेआ
काशगेआकृतीययोःतेव्योमगाकृती चिदाकाशरूपिण्योतेसंविदाव्योमगाकृतीवभूवतुरित्यन्वयः ॥ ॥ ॥

चेत्यसंवित्तेर्द्दशपज्ञानस्य चेत्यस्वभावादेव गतेन चिद्रूष्ट स्वभावात्तस्य सर्वव्यापारमधिमर्द्दकत्वात्॥ परिछिन्ने ब्राह्मणादं प
त्तिमंडपाकाशेमहान्स्रपंचोवर्त्तत इति॥ तन्निमिष्यात्वनिस्वयायदर्शयितुमावर्णयति एकार्णवमित्यादिना। कोमलमकर्क
शंकोषलमकृतोमंदवाघोराप्रमनासंगेगासंगेनसुखभोगंदंसुखानुभवदंकोमलमरूदासंगसुखभोगदं॥ मनोवेगेर्महा
(सिद्धैर्जितौवातगमागमौ। वायुगमनागमनेयस्मिंस्तत्तथा॥ वातगमागमजये मनोवेगर्त्वं हेखेः नमसि हि वाते नसहगं

अथ ते ललने लीलालोलेललितलोचने॥ स्वभावाच्चेत्यसंवित्तेनमोहृरमितेगते॥ दूरादूरमभिमुत्ययांत्योदह
शत्रुर्नभः॥ एकार्णविमिवोछूनंगंभीरं निर्मलांतरं॥ कोमलंकोमलमरूदासंगसुखभोगदं॥ मनोवेगमहासिद्ध
जितवातगमागमं॥ पर्यंतस्थितकूष्मांडरक्षःपेशाचमंडलं॥ नृत्यडिंडीकिनीसंघैस्तरंगितमिवाक्षचित॥ प्रवृत्तैर्यो
गिनीसंघैश्चकाकोष्टस्वराननैः॥ निरर्थयोजनशतंगत्वागछ्छिरावत॥ ॥ ॥ ॥

त्वमांगतंचप्रवृत्ता। सिद्धामनोवेगत्वात्पूर्वमेवगछंत्यागछंतिचेत्यर्थः॥ पिशाचानामिदंपैशाचंपैशाचं च कूष्मांडमंडलं
च कूष्मांडाभूतविशेषाः॥ कूष्मांडाश्चरक्षांसिचपैसाचमंडलंचेतितथापर्यंतस्थितानि कूष्मांडरक्षः। पेशांचमंडलानि
यस्मिंस्तत्तथा डाकिन्पोयहविशेषाः॥ तरंगितंसंज्ञाततरंगंप्रकृष्टंनृत्यंयेषुयोगिनीसंघेषुतेप्रवृत्तास्तैः। निरर्थंनिःप्रयो
जनं आगछ्छिरितिविशेषः॥ ॥

वातस्कंधेति॥ मेघमार्तंडयोर्मध्ये वातमार्गगच्छतित्र स्थितायेवातास्तेषां स्कंधा अंशा इह भागाः अथवा वातस्कंधावायुप्रभेदा यथोक्तं॥ कल्पतरोः स्कंधाः प्रभेदा इति। अथवा वातस्कंधा वातसमूहाः॥ तथा च क्षीरस्वामिन आहुः स्कंध स्कंधेति चेतन्त्ये व्याकुर्वाणा सखुयदयथा सघवातस्कंधाः॥ अपिशब्दः स्मैन्यवाचोयथा स्कंधपराः॥ क्षुद्रजपायामां सेराज्ञी समूहेवोधेति। तेभ्यानि यातानि त्र्यंतर्वहत्त्रिपथगाजलानि तं अवोखु तत्तया प्रवहत्सुरनदीजलानि यस्मिंस्तत्तथोक्तं॥ चित्रन्यस्तसमाकार चित्रार्पिततुल्याकारमूर्

वातस्कंधनिखातांतर्वहत्त्रिपथगाजलं॥ क्वचिन्निर्भिन्नसदनं गायत्रारद्धतुंबुरुं॥ चित्रन्यस्तसमाकारमूकककल्पांतवारिदं॥ क्वचिन्निरंतरोन्मत्तमातृमंडलमालितं॥ अपियोजनलक्षाणि क्वचिदड्डापपूतकं॥ अविनाशितमःपुंजेईषत्कर्मोपमं क्वचित्॥ अविनाशिबृहत्तेजः क्वचिदर्कानलोपमं॥ ॥ ॥ ॥ ॥

कानिः शद्वाश्च कल्पांतवारिदा प्रलयमेघा यस्मिंस्तत्तथा। मातरो ब्रह्म्यादयः निरंतरोन्मत्तमातृमंडलमालितं निरंतरेणानिविडेनोन्मत्तमातृणां मंडलेन मालितं संजातं मालं मालाकारमातृमंडलयुक्तमित्यर्थः॥ क्वचिद्योजनलक्षाणि उड्डापा निभृता निश्चाणानोयस्मिंस्तत्तथा। क्वचित्सर्वतः प्राणिरहितानेकलक्षयोजनकमित्यर्थः। कालाध्वनो रत्यंतसंयोग इति॥ त्वत्तयोजनलक्षाणीति द्वितीया। ईषत्कर्मस्य पाषाणाभ्यंतरस्योपमा यस्मिन्नत्तदीषत्कर्मोपमं अविनाशि बृहन्महत्तेजो यस्मिंस्तत्तथा अतएव

उडुंबरफलोदरस्यामशका उडुंबरोदरमशकास्तत्क्रमेणा तन्न्यायेन भ्रमज्जगत्त्रयांतर्गतिभूतानां संचयस्समूहो यस्मिंस्तेन तथाविलं
घेत्याद्यात्र जहोनुपरमेत्यंताप्राकृतग्रंथाः स्पष्टार्थाः क्वचित्किंचिद्विद्यते। वरवर्णिनि रूपोऽन्नमत्रियोऽविंतया विधुराङ्दृष्टार्थवर्जि

उडुंबरोदरमशकक्रमभ्रमज्जगत्त्रयांतर्गतभूतसंचयं ॥ विलंघ्य तद्दरलल्लने खसुद्धके महीतलं पुनरपि गंधमुघते
नसि षट्वाच ॥ इति तेव खर्णिन्यौ ततो ब्रह्मांडमंडलात् ॥ निर्गत्यान्यदद्भुतां प्रेयत्र तद्ब्राह्मणस्पदं ॥ ततो ददृशतुः सर्गतत्र
ते सिद्धयोषितौ ॥ अदृष्टपेऽवलोकस्य मंडपं ब्राह्मणस्पदं ॥ चिंताविधुरदासीकं बाष्पक्लिन्नांगनासुखं ॥ विध्वस्तपूर्वसंस्थानं
विद्युद्दग्धमिवद्रुमं ॥ अथसानिर्मलज्ञानधिराभ्यासेन सुंदरी संपन्नासत्यसंकल्पासत्यकामा च देववत् ॥ चिंतयामासमा
मेतं देवी वेमां स्ववांधवाः ॥ पष्पंत्तावस्मान्मान्यललनारूपधारिणी ॥ ततोऽस्य गृहजनस्तत्र संददर्शांगनाद्वयं ॥ लक्ष्मीगो
र्योर्युगमिव समुद्भासितमंदिरं ॥ नमोस्तु वनदेवीभ्यामिति स्म कृतकुसुमांजलि ॥ तत्याजऽस्पेषशर्माघिःसार्द्धं गृहजनेन सः ॥
देव्यावभवतां श्रेष्ठा विह ब्राह्मणदंपती ॥ ॥

तादृश्यो यस्मिंस्तं मंडपेमचिंताविधुरदासीकस्तं बाष्पेणाश्रुणा क्लिन्नान्यार्द्राणि अंगनानां सुखानि यस्मिंस्तं तथोक्तं विध्वस्तं विहंत
पूर्वसंस्थानं पूर्वविन्यासो यस्मिन्स तथा तं विद्युद्दग्धानिःसा नीलादेववत्सत्यसंकल्पासत्यकामा च संपन्नेत्यन्वयः ॥ ॥ ॥

वा·वि·
२९

29

सर्वो जनोतिथिर्जयोस्तौ सर्वातिथी कुलकरौ कुलवर्द्धकौ द्विजस्थितेर्द्विजमर्यादायाः॥ यद्वा द्विजस्थितेर्द्विजावस्थानस्य स्तंभभूता

सर्वातिथीकुलकरौ स्तंभभूतौ द्विजस्थितेः॥ तावेतौ गृहमुत्सृज्य सपुत्रपशुबांधवं॥ स्वर्यं गतौ नः पितरौ तेन शून्यं ज
गत्त्रयं॥ तद्देव्यौ क्रियतां तावदस्माकं शोकनाशनं॥ महतां दर्शनं नाम न कदाचन निःफलं॥ इत्युक्तवंतं सा पुत्रं मूर्द्धत
स्य शिरसि पाणिना॥ तस्याः स्पर्शनेन तेनासौ दुःखदौर्भाग्यसंकटं॥ जहौ प्रावृड्घनासंगीतग्रीष्मतापमिवाचलः॥ अथान्यो
पि जनस्तत्र जहौ शोकं दुरुत्तरं॥ तस्मिन्नगिरितटे ग्रामे तस्मिन्नंडपकोटरे॥ अंतर्द्धिमापतुर्दृष्ट्वा स्ततस्ते सिद्धयोषितौ

वाधास्तत्रौते भवदौर्भाग्यसंकटदुर्भगत्वसंबाधस्तंभ॥ छ ॥ ॥ ॥ श्रीगोपालाय नमः॥

राम
२९

॥ ७५

दृष्टांतं संविदः प्रपंचमिथ्यात्वे दृष्टांतसम्मतयोर्दृष्टा लब्धा इत्यर्थः ॥ ब्रह्मसत्ताब्रह्मरूपभूता मत्ताईदृशप्रसत्यजगद्रूपानि
ःप्रपंचावालीलास्मीतिविनेति ॥ अभ्यासेज्ञानाभ्यासंविनातवलीलास्मीतिभावोभावनायदास्तंगतोनाभवत ॥ तदाते
सत्यसंकल्पत्वंनाभूदितिसंबंधः ॥ अद्वैतेनब्रह्मणिचित्तवृत्तिनिरोधात्मकयोगप्रतिबंधभूतद्वैतनिश्चयस्यप्रविलयादथ

देव्युवाच ॥ ज्ञेयंज्ञातमशेषेणदृष्टादृष्टांतसंविदः ॥ ईदृशीयंब्रह्मशक्तिःकिमन्यद्वदपृच्छसि ॥ लीलोवाच ॥ मृ
तस्यभर्तुर्जीवोसौयत्रराज्यंकरोत्यसौ ॥ तत्राहंकिंनतेदृष्टादृष्टास्मीहमुतेनकिं ॥ देव्युवाच ॥ अभ्यासेनविनावत्से
तदातेद्वैतनिश्चयः ॥ नूनमस्तंगतोनाभूनिःशेषंवरवर्णिनी ॥ लीलास्मीतिविनाभ्यासंतवनास्तंगतोऽभवद्राय
दाभावसहसत्यसंकल्पत्वमभूत्तने ॥ अद्यासिसत्यसंकल्पासंपन्नातेनमांसुतः ॥ संपश्यपश्चित्यभिमतंफलितंत
वसुंदरि ॥ इदानींतस्यभर्तुस्त्वंसमीपंयदिगच्छसि ॥ तत्तेनव्यवहारस्तेपूर्ववत्संप्रवर्त्तते ॥ लीलोवाच ॥ अहोहंतजग
न्मातर्मयास्मृतमिहाधुना ॥ ममेदंराजसंजन्मनतमोनवसात्विकं ॥ ॥ ॥

सत्यसंकल्पासंपन्नासि ॥ सरस्वतीप्रसादसमासादितास्पर्शयोगलब्धालौकिकप्रभावाल्लीलानुस्मृतपूर्वजन्मावलिकृत्य
न्नपरमनिर्वेदासंसारस्यात्मनाझटितिहेयत्वज्ञापनायपूर्वजन्मानिवर्णयति ॥ अहोइत्यादिना ॥ वर्ततेतिखेदेऽइदंवर्तमानंक

ब्रह्मणः कमलासनादेस्तत्कल्पादाववतीर्णाया मनुष्यलोकापेक्षया लोकांतरं विद्याधरस्थानं। तदेवाब्जं कमलं तस्मिन्नप्स
मरी विद्याधरलोकवासिनी चेत्यर्थः॥ करंजो नक्तमालाख्यवृक्षः। चिरिबिल्वो नक्तमाल इत्य करंजश्च करंजक इत्यमरः विहंगपापघ्नि

ब्रह्मणस्त्ववतीर्णाया अष्टौ जन्मशतानि मे। नानायोनीन्यतीतानि पश्यामीवाधुना पुनः॥ संसारमंडले देवि कस्मि
न्खिदं भवं पुरा लोकांतराब्ज अप्सरी विद्याधरवरांगना। दुर्वासनाकलुषिता ततोहं मानुषी स्थिता॥ संसारमंडलेन्य
स्मिन्पन्नगेश्वरकामिनी करंजकुंजजंबीरकदंबवनवासिनी॥ पत्रां वरधरी श्यामा शबर्यहमथाभवं॥ विहंगा वैरिवि
न्यस्ता वागुरा विपिनावनौ॥ क्लेशेन महता छित्त्वा अथ मावासनाइव॥ कर्णिकाक्रोडशय्यासु विश्रांतमलिना सह
पद्मकुमलकोशेषु भुक्तकिंजल्कया रहः॥ ॥

यावैरिभिर्न्यस्तवागुरा लुब्धकविन्यस्तजालानि वागुरा मृगबंधनीत्युक्तोर्थः। त्रासंभवा त्वमगृह्यत विपिनावनौ अरण्यपद्मो
कर्णिकाकमलमध्यवर्त्तिबीजकोशः॥ कर्णिकानां क्रोडानि मध्यप्रदेशास्तान्येव शय्याः कर्णिकाक्रोडशय्यास्तासु कुमलो
मुकुलं। भुक्तकिंजल्कया भुक्तकेसरया अलिन्या मया विश्रांतं॥ ॥

अस्त्रीत्वंपुंस्त्वंचदेवफलंतद्धान्तरणांसमाःसंवसरान् ॥ शाद्वलीशाध्यवतीभूस्तथातरुणादलडोलायांशाद्वलीदलडोलातस्यां । आंदो
लनेनचलनेनदरिद्रताआंदोलनदरिद्रितातालहर्य्याद्रुमर्यां ॥ अत्रविषयतृष्णासंसारसरितोलहरीविवक्षिता । ऊर्वरिवानोयस्य
साऊर्वाखाताऊर्वाखातावासौतरणीवनौस्तस्यासरणांगमनं ॥ तत्क्रमेणतत्प्रायेन । दीर्घसरितश्चचलोर्म्यातिविषमस्तुह्यमाना

ततोस्त्रीत्वंफलंतद्धान्तराणांपरिपाकतः ॥ राजाहमभवंश्रीमान्नसुराद्रेषुसमाःशतं ॥ शाद्वलीदलदोलायामांदोलनदरिद्
तां । मशकस्यमयासहस्थितंमशकयासह ॥ योनिध्वजेकविधउःखशातान्वितासुभ्रांतंमयावऊविमर्द्दसमाकुलासु । सं
सारदीर्घसरितश्चलयालहर्याऊर्वाखातलहरीशरणक्रमेण ॥ वसिष्ठउवाच ॥ एवमाकथयंत्यौतेललनेललिताकृ
ता ॥ इत्येतद्वनाभोहरयोगचंक्रमणक्रमैः ॥ विनिर्गत्यततःसर्गाच्छस्यसर्गंद्वितीयकं ॥ अंतःपुरेदहशक्रवर्भूरितीविचि
निर्यते ॥ ॥

याःप्रचंडवायुमध्यवर्तिनौकाकायाः ग्राम नन्यायेनसंसारदीर्घसरितोविषयतृष्णालक्षणयालहर्यायोनिध्वावर्त्त
ल्पासुभ्रांतमित्यर्थः ॥ इत्येतद्ब्राह्मणामंडपाद्गृहजंगमतःयोगप्रयुक्तंचंक्रमणंतत्क्रमैः ॥ व्याख्यायाप्याद्वितीयकंपप्रच्छ
संबंधिनं ॥ ॥

पुनरपि लीलासरस्वत्यो श्च प्रपंचमिथ्यात्वनिश्चयाय दृश्यापादकप्रवृत्तिप्रतिपादनाय यस्मात्ततः पुनरित्यादिराख्यानसमाप्तिपर्यंतो
ग्रंथसंदर्भः प्रायेणास्पष्टार्थः॥ तत्रकानि विद्धि विभ्रमं ते। विचित्र महासंरंभोपि संसारो मिथ्येति दर्शयितुं पद्मनृपतिमंडपाकाशभ्रां
तरंगतसंसारांतरे हस्तस्य सांगोपभुक्तस्यावर्त्तनानी यत्वमिति ज्ञेयं॥ अवस्कंदनमागमनं राष्ट्रशोषणं वा। साम तैक्ष्ण्याद्विक्रोभिरुद्धः सामंतो

तरंगतसंसारांतरे हस्तस्य सांगोपभुक्तस्यावर्त्तनानी यत्वमिति ज्ञेयं॥ अवस्कंदनमागमनं राष्ट्र

विवेशाभर्तृसंसारं लीलात्यक्तिसमन्विता॥ ए
स्थितं पुष्पभराकीर्णं महारात्रमहार्णवं॥ ततः पुनर्विनिर्मत्यियोगस्यादिमयोगिनी॥ विवेशाभर्तृसंसारं लीलात्यक्तिसमन्विता
तस्मिन्नंतरेतस्मिन्नमंडले मंडितांबरे॥ वक्त्रोऽवस्कंदनकृच्छ्रिसामंतो द्विक्तभूमिपः॥ कस्मिंश्चिद्धिततारणेपेद्धितीयाकाशभीष
णो॥ सेनाद्वितयमक्रूद्धं सौम्यावितद्वियोपमं। महारंभवनमध्यस्थितराजद्वयान्वितं॥ युद्धसज्जसमुत्तद्वमिद्धमनिमिवाकुलं॥
लीलावजगाम्दिव्यैवसंददर्शनभस्थिता॥ अथ प्रवृत्तः प्रसभं चलयार्णवरंहसा॥ सेनयोः शस्त्रसंपातः किरन्ननलविघ्नतः॥ प
त्तसमदमातंगकंपितोर्वीचलज्जलः॥ यंत्रपाषाणचक्रोय द्रविडतखेचरः॥ ॥ ॥

दिक्तस्यवासोभूमिपश्चेति तथोक्तः॥ सोम्यं सुंदरं॥ महारंभेण महायुद्धरंभेणाहेलनाघननिविडं महारंभवनं युद्धार्थसज्जंसत्रद्धंयुद्धस
जाड्यंदीमं॥ रंहसावेगेन किरन्विक्षिपन् अनलविद्युतः॥ अनलाएवायुद्धसंघट्टजाविद्युदाकारत्वाद्विद्युतः ताः किरन्पतद्भिः समदमातंगैः
कंपितायामुर्व्यांचलंतिजलानियस्मिन्संपाते सनतथा॥ यंत्रप्रेरितपाषाणैश्चक्राणां मोद्वेश्चद्रविडताःखेचरादेवादयो यस्मिन्सतथा॥

हृद्रोड्डीनानि उड्डीनानि कबंधानि विकसंति यानि षड्गखंडानि तैस्तारकितं संजातं तत्ताद्रक्मंबरमाकाशं यस्मिन्स तथा वज्रमुष्टीति॥ वज्रमुष्टिभिर्ये विनिष्पेषाः संपेषणानि तैः पिष्टाश्चूर्णिताः सद्भटकंकटाः साधुभटकवचा यस्मिन्स तथा। उरश्छदः कंकटको जगरः कवचो ऽस्त्रियामित्यमरः॥ नाराचानां सर्वलोहमयबाणानां वर्षेणैव वनवारीणि तानि ददातीति नाराचवर्षवरवारिदा निवीरः शूरवीरसमूहा

हृद्रोड्डीनकबंधषड्गखंडतारकितांबरः। वज्रमुष्टिविनिःपेषपिष्टसद्भटकंकटः॥ नाराचवर्षवरवारिदवीरशूरमत्ताश्रमश्रमवि वृत्तकबंधवर्ही कल्पांतकाल इव वेगविवर्त्तमानमातंगशैलवलितो रणसंभ्रमोऽभूत्॥ ॥ ॥ श्रीगोपालायनमः

तत्र एव महत्त्वं श्रमाणि नाराचवर्षवरवारिदानि च तानि वीरपुरुषमत्तश्रमाणि च तेषां संभ्रमाद्विनृत्ताः प्रनर्त्तनाः कबंधबर्हिणः कबंधमयूरा यस्मिन्रणसंभ्रमे स तथा॥ अथवा मत्ताश्रमेभ्यो निमित्तेभ्यः संभ्रमेण विनृत्ताः कबंधबर्हिणो यस्मिन्स तथा॥ कबंधो ऽपमूर्द्ध रहितः क्रियायुक्तो देहः कबंधोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरमित्यमरः वेगेन विवर्त्तमानाः भ्रमंतो ये मातंगाः शैलाः गज पर्वतास्तैः वलितः संबद्धः॥ ॥

त्रिंशतंभागस्यदिनस्याष्टौभागायस्यांशोष्टभागोदशाशेषोयस्यरवेःसोष्टभागदशाशेषःसचासौप्रकृष्टतापेनमधुराकृतिश्चेतित
थोक्तः॥ यद्वाअष्टभागदशाविशरणावस्थासाशेषोयस्यसोष्टभागदशाशेषःसचासौप्रतापश्चतेनमधुरादर्शनीयाकृतिराकारोय
स्यसतथोक्तः।वीरपक्षेतुहृदाद्वेषशत्रुभयजनकःप्रभावःप्रतापःअष्टौभागायस्यसोष्टभागःदशामरणदशाशेषोयस्यसदशाशेषः
अष्टभागश्चासौदशाशेषश्चेत्यष्टभागदशाशेषःसचासौप्रतापमधुराकृतिश्चेतितथोक्तःअथवाअष्टौभागायस्यांदशायां

एवमत्याकुलेयुद्धेसास्फोटभटसंकटे॥अष्टभागदशाशेषप्रतापमधुराकृतिः॥मास्त्वद्यानहतोवीरइत्वार्कस्तत्रतांधयौ
अथसेनाधिनाथाभ्यांविचार्यसहमंत्रिभिः॥हूतापरस्परंदत्त्वायुद्धंसंक्रियतामिति।ततोऽडंडभयोनेडःप्रतिघ्नितदि
ग्मुखाः॥विनिर्घ्नंप्रवव्रतेरणारणपाहृलहृयं॥अथवीरइवारक्तःकालेनास्तमितोरवि॥ततोध्वांतोद्बनासीरेनिशाये
समुपस्थिते॥लीलापतिरुदारात्माकिंचिद्विखिन्नमनाइव।प्रातःकार्यंविचार्यंस्मिमंत्रिभिर्मंत्रकोविदैः॥निद्रांसुहर्त्ता
मारेभेगृहेशशिकरामले॥ततस्तेदिव्ययोगिन्यौराज्ञोविविशतुर्गृहं॥ ॥

सासेषोयस्यवीरस्येतिविग्रहः॥यद्वाअष्टभागदशाविसरणावस्थासाशेषोयस्यप्रतापस्यतेनमधुरादर्शनीयाकृतिर्यस्यस
तथोक्तः॥शेमुःशाम्नाशमउपशमनंइतिधातोर्लट्वऊवचनंवीरोविउधिरोक्तिलत्वादारक्तोभवति।ध्वांतोघोरांधकारसमूहएवना
सीरंसेनाग्रंयस्यनिशीथराजस्यसतथोक्तःतस्मिंउदारात्माउन्नमचित्तः॥ ॥ ॥ ॥ष्ट॥ ॥

कोमलेति मृदुः कोमलो मंदो मंगलसौगंध्यो निर्मलसौरभश्च मृदु मंदा स्पुष्पाणां मारुतो यस्मिन्गृहे तत्तथेति विग्रहः। निश्चंद्रो
त्रकिरणाः आह्लादितः सुखितः पुष्पाणपा हारो यस्य स पुष्पाहारः पुष्पाधारइतिक्कचित्तत्रमालाकारइत्यर्थः॥ उत्फुल्लं विक

कोमलामलसौगंधमृदुमंदारमारुतं। तत्प्रभावेणनिद्राणानृपेणरवरांगनं। तयोर्देहप्रभाश्रैः शशिभिः छन्नशीतलैः। आ
ह्लादितो सौवुबुधे राजो स्थितइवामृतैः॥ आसनद्वयविश्रांतं सदद्दर्शांगनाद्वयं॥ सम्प्रपालोथसंचिंत्य सुविस्मितमनाहृ
णात॥ उत्तस्थौ शयनाद्धेषादिवचक्रगदाधरः॥ पुष्पाहारइवोत्फुल्लं जग्राहकुसुमांजलिं॥ भ्रमौ विवसने भुक्ते वक्षपप्रा
सनो नृपः जघे तांजनदोस्थित्यदाहदोषशशिप्रभो॥ द्व्यौ वाह्यांतरतमोविशवराणविप्रभो॥ तयोरुक्तेतितत्साजपा
दयोः कुसुमांजलिं॥ लीलायैमृपजन्मायवक्रुमंविणामीश्वरी॥ बोधयामासपार्श्वस्थं संकल्पेन सरस्वती॥ योगिन्यो
सत्तु तेद्दृष्टाप्रणाम्यकुसुमांजलिं तयोः पादेषु संत्यज्य विवेशपुरतो नता॥ उवाच देवी हे राजन कथं कस्य कुतः कदा॥ इहजात
इति श्रुत्वा समंत्री वाक्यमब्रवीत॥ ॥

सितं विवसने विवस्त्रे देशे वस्त्रावरणरहिते देशइत्यर्थः॥ जनदोस्थित्येति॥ जनानां दोस्थित्यं जनाद्दिदोषदुष्टस्थितत्वं तेनाग्निना
दाहएवदोषः तद्धेमकशशिप्रभे॥ वाह्यांतरेति॥ वाह्याभ्यंतरपदार्थविषयाज्ञानांधकारविद्रावकादित्यप्रभे॥ तयोः पदयोरिति संबंधः॥ प
दयोरितिद्विव

वकुंशो क्रोमीति यत अयंसुषमस्वसादश्ति संबंधः। दोःछायाछादितावनिर्भुजछायासंछादितभूमिः सम्यग्रक्षितभूमिरित्यर्थः। दे

दोयो सुषमस्वसा दोयंभवत्योरपि यत्स्वरः। वकुंश क्रोमि तदिदं शृणुतं जन्म मत्वमोः॥ आसीदिक्ष्वाकुवंशस्यो राजा राजीवलोचनः॥ श्रीमान्कुंदरथो नाम दोःछायाछादितावनिः॥ तस्याभूदिदुंविदाभः पुत्रो भद्ररथाः॥ तस्य विश्वरथः पुत्रस्तस्य पुत्रो मनोरथः॥ अथ मस्मत्स्वभुक्तस्य पुत्रः पूर्णामलाकृतिः॥ महद्भिः पुण्यसंभारैर्विदूरथ इति श्रुतः॥ जातो मातुः सुमित्रायां गोथाद्विगुहोपरः॥ पितास्य दशवर्षस्य दत्वा राज्यं वनं ययौ॥ पालयामास भूपीठं ततः प्रभृति धर्मतः॥ इत्युक्त्वा संस्थिते तूष्णीं मंत्रिन्यथ नृपे तथा॥ कृतांजलौ नतमुखे वद्धपमास न स्थिते॥ राजन्स्मर विवेकेन पूर्वजातिमितिस्वयं। वदंती मूर्ध्नि पस्पर्श तं करेण सरस्वती॥ अथाहार्द्दतमोमाया राज्ञोस्य स्वयमाययौ॥ संस्मार पूर्ववृत्तान्तं तमंतः स्फुरदिव स्थितं अन्यदेहैकराजसंलीलाविलसितान्वितं॥ एवावात्मनि संसारे वतमायेयमागताः॥ परिज्ञाता प्रसादेन सोवर्षाणि सम तिस्मराम्यनेककर्माणि मित्रबंधुपरिच्छदान्॥ ॥

तमसो बहुदुर्द्धटकारित्वादर्शनाय विशेषणं मायेति। लीला या भार्या या विलसितैर्विलासैरन्वितं लीलाविलसितान्वितं। आसमंतात्ततावामा आतता॥ ॥

लोकयतइति। लोकोदेहः तस्मिन्नास्फारोमूर्च्छा शोकमयंविशदयति॥ तदेवेति॥ व्यवहारभ्रमैराततंव्याप्तंव्यवहारभ्रमाततं प्रतिभानमेवले
शतोदर्शयति॥ वयसइति॥ सतायुर्वैपुरुषइत्युक्तायुषः संबंधीनिसप्ततिवर्षाणिसमतीतानीतिप्रतिभानंजातमितिसंबंधः॥ किंतर्हिवस्तु
तत्त्वमित्याकांक्षायांवस्तुतस्त्वित्यादिनाश्लोकद्वयेनतदाह॥ तत्वदृष्टिमवलंब्याह॥ नचपश्यसीति॥ प्रकचसिविस्फुरसि॥ इदानींप्रपन्न

ज्ञप्तिरुवाच॥ राजन्स्मृतिभर्त्रामोहमूर्छायाः समनंतरं॥ तस्मिन्लोकांतवातीतेतस्मिन्नेवमुहूर्तके॥ तस्मिन्नेवगृहेजातःस
र्गोयंस्पष्टरविभ्रमः॥ तवमायाविलासेरैवचेतसिनिर्मलाकाशनिर्मले॥ प्रतिभानमिदंजातंव्यवहारभ्रमाततं॥ वयसःस
मतीतानिनमवर्षाणिसप्ततिः॥ यथास्वप्नमुहूर्तेतेसंवत्सरशतभ्रमः॥ तवमायाविलासेननतथायंजातिभ्रमाः॥ वस्तु
तस्तुनजातोसिनमृतोसिकदाचन॥ शुद्धविज्ञाननप्रस्वंशांतआत्मनितिष्ठसि॥ पश्यपस्थयेतदखिलंनचपश्यसिकिंचन॥
सर्वात्मकतयानित्यंप्रकचस्यात्मनात्मनि॥ यस्तप्रबुद्धमतिर्मूढोरूढोनविततेपदे॥ वज्रसारमिदंतस्यजगदस्त्रसदेवस तत॥

त्त्वविद्दृष्टिस्तत्वदर्थतद्विपरीतदृष्टिहातार्थंचविद्ददृष्टिंवर्णयति॥ यस्तप्रबुद्धमतिरित्यादिनादीर्घस्वप्नमित्यतः प्राक्तनेनग्रंथसंदर्भे
णासंबोधनविततेसंव्याप्तेपदेवस्तूनि रूढः प्रसिद्धः वस्तुतोसदेवजगत्तस्यमूढस्पदृष्ट्यासन्नपरमार्थसाक्षात्वज्रसारंचास्तिवज्रस्यसार
इवसारः स्थिरांशोयस्मिन्नतन्नथा॥ ५ ॥

वेतालोत्रवालेन स्वच्छायामारोपितो विवक्षितः मृतिपर्यंतदुःखदो मरणपर्यवसायिदुःखं ददद्यथा सत्सदिवाभाति। तथा मूढमतेर्जग
दसत्याभं भवति॥ तापो मरुभूमिगतः भ्रमतो भ्रमाता कटककल्पनायाः अधिष्ठानभूते कनके हेम्नि विषये अभ्युत्थस्यासंजात
विज्ञानस्य कानककेकन कविक्रते कटकेकटकत्वाग्निः। कटकोयमिति विपरीतज्ञानमेवास्ति मनागपि इदं पिहेमधीर्नास्ति॥ नाय
कटकः किंतु हेमैवेति प्रमितिर्नास्तीत्यर्थः॥ यथायं दृष्टांतस्तथाज्ञस्याधिष्ठानब्रह्मणोभिज्ञस्येयं दृश्यदृक् दृश्यत्रांतिरिवास्ति॥ अ

यथा बालस्य वेतालो मृतिपर्यंतदुःखदः॥ असदेव सदाकारं तथा मूढमतेर्जगत्॥ तापएव यथावारि मृगाणां भ्रमतो भवेत्
। असत्यमेव सत्याभं तथा मूढमतेर्जगत्॥ अभ्युत्थस्य कनके कानके कटके यथा॥ कटकज्ञप्तिरेवास्ति न मनागपि हेमधीः॥
तथाज्ञस्य पुरागारनगनागेंद्रभासुरा॥ दृश्यदृश्यदृगेवास्ति न त्वन्या परमार्थदृक्॥ दीर्घस्वप्नमिदं विश्वं विद्धि तादृक्संयुतं॥
अजात्रान्ये स्वप्नपुरुषा यथामी नागतास्थिताः॥ अस्ति सर्वगतं शांतं परमार्थघनं शिवं॥ अचित्यचिन्मात्रवपुः परमाकाश मातनं॥

न्या परमार्थदृङ्नास्तिनेन दृश्यरूपे किं तु ब्रह्मैवेति प्रमितिर्नास्तीत्यर्थः॥ नगः पर्वतोवृक्षो वा॥ नागो गजः काद्रवेयो वा॥ एवं हे घामज्ञाहि दृष्टिं दृष्टिं
दर्घाधियित्वोपादेयां त्वं तत्त्वदृष्टिं प्रपंचयाति॥ दीर्घस्वप्नमित्यादिना॥ अत्र जगति स्वप्नदृष्टुरन्ये स्वप्नदृष्टाः पुरुषा यथामिथ्या तथा जाग्रत्
पुंसोन्ये मी पुरुषा मिथ्यैवा परमार्थश्वनत॥ घनं चेति परमार्थघनोघनं निरंतरं॥ अचेत्य चिन्मात्रवपुर्विषय चिन्मात्रस्वरूपं परमाकाशं परंब्रह्म
सर्वगत त्वं निरंकुशमिति वक्ष्यमाणत्वमिति सूक्तं॥

सर्वं गच्छति जानातीति। सर्वगं॥ तत्सर्वमिति त्वाधायां सामानाधिकरण्यं सर्वात्मकं। सर्वेषामात्मस्वरूपमनुस्यूततया यस्य तत्सर्वात्मकम्॥
हे राजन्नेषत्वं॥ लीलार्थं लीलायाः प्रपंचमिथ्यात्वे दृष्टांतसिद्ध्यर्थं। अथवा लीलार्थं लीलाप्रत्ययार्थमेवमुपवर्णितः। दृष्टांतदृष्टयः प्रप-

तत्सर्वगं सर्वशक्ति सर्वं सर्वात्मकं स्वयं। यत्र यत्र यथोदेति तथास्ते तत्र तत्र वै। तदेव मेषराजं स्वं लीलार्थमुपवर्णितः। स्वप्निते
स्वगमिथ्यावो दृष्टा दृष्टांतसंविदः। विदूरथ उवाच। ममापि दर्शनं देवि मोघं भवति नार्थिषु। महाफलप्रदायास्तु कयं तत्र भवि-
ष्यति। अहं देहमिमं त्यक्त्वा तं देहं प्रपनामकं। कदा यास्यामि वरदे तन्मे कथय तत्त्वतः। देव्युवाच। अस्मिन्रणावरे राजन्नमर्द-
यं भवताधुना। प्राप्तव्यं प्राक्तनं राज्यपत्तनं तत्त्वत्यक्रमेव ते। वसिष्ठ उवाच। प्रस्तुतेति कथायां वन्हि थ्योमधुरभाषिणोः। ताव-
त्प्रविश्यं संभ्रांतमुवाचोर्द्ध्वस्थितो नरः। देव पट्टिश चक्रासिगदापरिघवृष्टिमत्। महत्परिव लंप्राप्तमेकार्णव इहोद्धतः। नगाले-
गसंकाशेलग्नोग्निर्मापिदिक्तटः। दहन्स्वटचटारवःस्फोटैः पातयन्क्रमान्महान्। कल्पांबुदघनतुल्पाभो म्निमन्महाइयः। वा

मिथ्यात्वे दृष्टांतत्वनिश्चया दृष्टा लब्धा इत्यर्थः। पट्टिशमयतोधारः आयुधविशेषः। परिघो मूलेति वद्धो लगुडः॥ नगः पर्वतः। कल्पांबुदघ-
टा तुल्या। प्रलयमेघसमूहतुल्याः प्रोज्झमनं प्रकर्षेण हमनं इत्यर्थः॥ ॥ ॥

पउषः कर्कशः आसमंताद्रवः शब्दोयस्यसपउषारवः उदभूत् उद्भूतः। आशादिशः दृढंहतांगर्जतांतरस्विनांवलवताद्विरणोन्नराः
सहोवलवीर्याणिस्थामस्तुष्मःसौर्यंचेत्यमरः॥ पक्षात्तरस्विनांजववतांरहस्तरस्वीतुरयस्यदइत्यमरः। चटचटहलहलेतिचशब्द
तुकारोचटचटास्फोटैर्हलहलारवैश्चसहधनुषांकुंजराणांचकोलाहलउदभूदिति पूर्वेणान्वयः॥ वातायनंगवाक्षःवातायनंगवा
सशंभ्रमंवदत्येवंपुरुषेपुरुषारवः॥ उदभूत्पुरयन्नाशाबहिःकोलाहलोमहान्॥ वलादाकर्णकृष्टानांधनुषांशरवर्षिणां
दृढंहतामतिमत्तानांकुंजराणांतरस्विनां॥ पुरवेटचटास्फोटैर्ज्वलितांजातवेदसं॥ पौराणांदग्धदाराणांमहाहलहलारवैः॥ अथ
वातायनाद्देव्यौमैत्रीराजाविदूरथः॥ ददृशुःप्रोद्यत्सन्नादंमहानिर्घ्रिमहापुरं॥ प्रलयानलसंकुद्धसप्तैकार्णवरंहसा
दुर्णिपरवलेनोग्रकल्पमेघतरंगिणा॥ कल्पांतवह्निविगलन्मेरुमंदरभासुरं॥ दह्यमानंमहाज्वालाजालैरंवरपूरकैः
द्वौस्त्रीत्यमरः एकश्वासावर्णावश्चेकार्णवःसप्तवासावेकार्णवश्चसप्तैकार्णवस्तस्यरंहइहवरंहोवेगोयस्यतत्तथा॥ उ
ग्रायेकल्पमेघाःप्रलयमेघाःतद्वत्तरंगाःतत्तुल्पाकारायस्मिनपरवलेतदुग्रकल्पमेघतरंगितेनकल्पांतवह्निविगलन्मेरुमंद
रभासुरंकल्पांतवह्निनादग्धत्वाद्विगलंतौविभ्रस्पंतौयौमेरुमंदरौतद्वद्भासुरंभासनशीलं॥ ॥ ॥ ॥ श्रीगोपालाय

मुष्टिग्राह्यायेमहामेघा गर्जागर्जनानि तद्वद्घानि संतर्जनानि तैरूर्जितैरभिरूढैः॥ यद्वा मुष्टिग्राह्या महामेघगर्जा तद्वद्घानानि संत
र्जनानि तैरूर्जितैः कलकलारावैः कोलाहलनिस्वनैः कोलाहलः कलकल इत्यमरः। कलकलेतिशब्दानुकारेण वा। मांसलैः सान्द्रै
रित्यर्थः॥ कलकलारावैः दस्युजल्पितैः घोरमिति संबंधः। अथवा दस्युजल्पितैरेव अभिमांसलैः कलकलारावैः घोरमित्यन्वयः॥ त

मुष्टिग्राह्यमहामेघागर्जसंतर्जनोर्जितैः॥ घोरं कलकलारावैर्मांसलैः दस्युजल्पितैः॥ तरडुल्मुकखंडोग्रतारातरलितांबरं
आंगारराशिनिपतन्नरनार्युग्ररोदनं॥ एतस्मिन्नंतरे राजमहिषी मन्नघोवना॥ अनुयाता वयस्याभिर्विवेशभयविह्वला॥ अथ त
स्या वयस्यैका राजानं तं व्यजिज्ञपत्॥ देव देवीसमायाता पलाय्यांतःपुरांतरात्॥ राजदारा हृतास्ते ते बलवद्भिरुदायुधैः॥ अंतःपुरा
धिपाः सर्वैः पिष्टाः शत्रुभिरुद्धतैः॥ दूरे गा शंकमायातैः पौरैर्न्नः पुरमाहृतं इत्याकर्ण्य विलोक्यासौ देव्यौ युद्धाय यास्पतः॥ ७ ॥

रडुल्मुकेति तरलितरसतलं घर्षयंति याः उल्मुकखंडानि तान्येवोग्रतारानुप्रनक्षत्राणि ताभिः तरलितं ललितं अंबरमाकाशं यस्मि
न्पुरे॥ तत्तथा॥ यथाहुः क्षीरस्वामिनः त्रेपोलितस्तवलितो लुलितं तोलिभावपीति अंगारराशिषु निपतन्नरनारीणामुग्रं रो
दनं यस्मिन्न तत्तथा। वयस्याभिः सखीभिर्व्यजिज्ञपत् विज्ञापितवती। ज्ञा अवबोधने इति धातोर्लुङ् नपि ष्टा चूर्णिता। न विद्यते शंका
यस्मिन्न कर्मणि तदशंकं। आहृतमपहृतं॥ देव्याविति संबोधनं॥ ॥

षघटी भ्रमरी। कंदरा दर्याः इयमहं कस्मात्स्थिता इयं मत्समा कस्मात्स्थितेति यावत्॥ नन्वियं योगप्रभावात्सादिता मानुषशरीरया
।त्वया समाना भवतीत्याशंक्याह। यासेति। आत्मावरेत्वज्ञावनाभावितेन त्वज्ञानात्वत्सदृशा तथा कल्पितत्वात्। लीलात्वत्समा स्थितेत्युत्तर
मभिप्रेत्याह॥ यादृगिति। तमेवार्थं तत्सदृशमेवार्थमित्यर्थः। नन्वियं लीलाकल्पिता चेदस्याः किरजतादाविवास्यां विसंवादः कथं न जायतेत्याशं

हन्यतां मम भार्येयं पुष्पत्यादाश्च षघटी। इत्युक्त्वा निर्ययौ राजा कोपाकुलितलोचनः। मत्तेभनिर्भिन्नवलकंदरादिव केसरी। लीला
लीलां ददर्शाथ स्वाकारसदृशाकृतिं। प्रतिबिंबमिवायातामादर्शे चारुदर्शनां। प्रबुद्धलीलोवाच। किमिदं देवि मे ब्रूहि क॥ ॥
स्मादहमियं स्थिता। यासाहमभवं पूर्वं कथं सेयमहं स्थिता। ज्ञप्तिरुवाच। यादृग्भावो मृतो भर्त्ताभवत्तस्मिंस्तदा पुरे। ता॥ ॥
जगज्जालोत्पत्तेरपि॥ ॥

त्वत्सुतैर्मरीच्यादिभिः। तद्वत्स्थितिर्ययोस्तौ तद्वत्स्थितीजलाहारं व्रतं तरोऽसिद्धमेव भव्या योगपायेन दशपुत्रभवनेनशो

तले कैलासशैलस्य जंबूद्वीपैककोणके ॥ सुवर्णजटनाम्नाय त्वसुवर्णजनितप्रभैः ॥ मंडलं कल्पितं श्रीमदनल्पसुख
सुंदरं तत्रास्ते दितिधर्मात्मा ब्राह्मणो ब्रह्मवित्तमः ॥ इंदुनामातिशांतात्मा कश्यपस्य कुलोद्भवः ॥ तस्य जातासमा भार्या
काचित्तस्यां महात्मनः नवमत्वात्मजस्तस्य मरुस्थमोन सर्पथा। तेनतौ दंपती खिन्नोपुत्रार्थं तपसे गिरेः॥ कैलास
स्य समारूढौ सुचिव्रतपरायणौ ॥ भूतैर नाहृतेभून्येत स्मिन्कैलाशकुंजके नयतस्तौ तपो घोरं जलाहारौ तरुस्थि
ती ॥ ततस्तुष्टो भगवद्देवस्तयोः शशिकलाधरः ॥ आजगामाथतं देशं यत्र तौ विप्रदंपती वरं विप्रगृहाण सुतुष्टो
स्मि तस्तुवाचहा ॥ विप्रउवाच ॥ भगवन्देवदेवेश दशपुत्रा महाधियः भव्यभवंतु मेभूयः शोकोयेननवाधते॥
अथैवमस्त्विति प्रोच्य जगामांतर्हितो मीश्वरः ॥ ततस्तौ दंपती हृष्टौ वरलब्धा स्वगृहं गतौ। ततः कालेन सुषुवे दशपुत्रा
ननिंदितान् ब्राह्मणा दशते वालाः क्रमेणाप्रौढिमायपुः ॥ अथ कालेन महता तेषांवौ पितरौ तदा। संजग्मतु
स्तनुं त्यक्त्वा स्वां गतिं गतिको विदौ ॥ मातापितृभ्यां रहितास्ततस्ते ब्राह्मणा दश॥ ॥

कामांभ्रयोनवाधते तदास्थिष्क्षित्याभ्याहारः॥ यक्षायेनेति ॥ एकस्य विवक्षितं॥ये ॥ पुत्रैः खेदिनोऽडः ॥ विनंगद्विग्नांडध्वे।
युक्ताः ॥ विवन्धवो विगतबंधवः॥ ॥

राजानो मंडलेश्वराश्च आज्ञया राज्ञः शास्ति स सम्राडित्युच्यते ॥ शास्ति यश्चाज्ञया राज्ञः स सम्राडित्यमरः ॥ साम्राज्यं किं नाम सम
मदितिसंबंधाः यन्महेंद्रत्वं प्रजापतेर्द्द्वर्लवर्त्तते प्रजापतेर्ह्रि दिने चतुर्द्दश इन्द्रा भवंति ॥ तत्रैकैको मुहूर्त्तमात्रं त्रैलोक्यं

युध्रुः कैलाशशिखरसंस्थं हंसं त्यक्त्वा खेदिनः ॥ तत्र संचिंतयामास सुरुद्विग्नात्मा विविंबवः ॥ किं स्यादिह परं श्रेयः किमिह सा
ख्युः खदं ॥ किं यदेतज्जने ऐश्वर्यं सामंतो हि महेश्वरः ॥ सामंतसंपत् किं नाम राजानो हि महेश्वराः ॥ किं नाम सम्यस्य भूपा
नां सम्राडिह महेश्वरः ॥ किं नाम संपत्साम्राज्यमिंद्रस्तेषां महेश्वरः किं नाम तन्महेंद्रत्वं यन्मुहूर्त्तं प्रजापतेः
विनश्यति नयकल्पे किं तस्मादिह शोभनं ॥ ज्येष्ठ उवाच ॥ ऐश्वर्याणां हि सर्वेषां माकल्पांता विनाशिता ॥
रोचते भ्रातरः तन्मे ब्रह्मत्वमिह नेतरत् इतरे ऊचुः ॥ युक्तमुक्तं त्वया तात सर्वदुःखापमार्जनं शाधि तत्स्वं गतिर्नो
घ विरिंचित्वमवाप्नुमः ॥ ज्येष्ठ उवाच ॥ प्रप्रसन्नगतो भास्वान् ब्रह्माहमिति तेजसा ॥ सृजामि संहरामीति ध्या
नमह्नि निरायवः ॥ ॥

शास्ति भ्रातर इति सखो धवतं मे मद्धं । तातेति पितृसमश्रेष्ठात् ज्येष्ठः संबोध्यते । सर्वदुःखापमार्जनं ॥ सर्वदुःखशमकं शाधि
अनुशासनं कुरु । भास्वान् दीप्तिमान् तेजसा प्रभावेन तेजसः प्रभावे दीप्तौ च जले शुक्रे पतत्रिष्वित्यमरः ॥ ॥ ॥

अग्रजेनेतिकथितावादंकृत्वातत्तमाः॥ध्यानाधीनधियस्तत्रलिपिकर्मार्पितोपमाः।अंतस्थेनैवमनसाचिंतयामासुरा
दृताः॥ब्रह्माहंजगतःस्रष्टाकर्त्ताभोक्तामहेश्वरः।लोकपालपुरैःसार्द्धंभुवनानिचतुर्दश।निर्मितानिमयैतानितेषामंतरहं
स्थितः॥अथतेब्राह्मणाएवंवपुःप्रज्ञभावनाः।देहाविस्मरणंस्वंस्वंभावनयार्पिताः॥अथतेदेहकाःसर्वेपवनैरात
पेनचः।कालेनशोषमभ्येत्यगलिताःशीर्णपर्णवत॥सतेषांदशधासर्गप्रतिभासोयमुत्थितः॥भावनापरिपाकेनदश

एतेदशसंस्कारामनोव्योमनिरंस्थिताः॥एषामन्यतमस्याहंभास्करोहंनिशाकरः॥इत्युक्त्वावेधसंभानुर्जगाम
निजमंदिरं।विरंचिरपिदेवेशःस्वव्यापारपरोभवत॥ इतिमोक्षोपायेऐंदवोपाख्यानन्नामाष्टमःसर्गः॥ ॥

तेक्षस्ततांगताः।तएतेदशसंवाहामत्यस्पयंअस्तुपगमे॥लिपिकर्मविसस्मरुर्विस्मरणंचक्रुः॥अर्पिताविषयीकृताइति
यावत॥अथवाअर्पितान्समर्पितान्दत्त्वानित्यर्थः॥स्वकृत्यमाहनिशाकरंभास्करोहिमेरुपर्वतेनाव्यवहितोऽहःक
रोतितद्व्यवहितस्तुनिशांउक्तेच॥इहह्यशिष्टे।अर्कःकुर्वन्नहोरात्रेदर्शयत्याकृतिंयथा।चितिःसदसतीकुर्वन्नदर्शयत्या
कृतितथेति॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यात्मसुखवेवासिष्ठप्रकरणेऐंदवोपाख्यानामाष्टमःसर्गः॥ ॥

र्अतीतेनाख्यानेनतात्पर्यतः प्रतिपादितमर्थंदर्शयति॥ मनोहीत्यादिश्लोकद्वयेनमनःकृतंमनसाकृतंसम्यक्कृतं
मन्ये मनःकृतमेवसार्थकंजातइत्यर्थः॥शरीरकृतकर्मणांफलत्वव्यवस्थाप्रत्यक्षादिसिद्धत्वाच्छरीरकृतसार्थकंभवतां

वसिष्ठउवाच॥ मनोहिजगतांकर्तृमनोहिपुरुषःपरः॥ मनःकृतंकृतंलोकेनशरीरकृतंकृतं॥ सामान्यत्रास्म
णाभूत्वामनोभावनयाकिलाऐंदवाब्रह्मतांयातमेनात्मनसःपश्यपत्तक्तितां॥ मनसाभाव्यमानोहिदे
हितांयातिदेहकः॥ देहभावनयामुक्तोदेहधर्मैर्नबाध्यते

मुक्तं अनुपपन्नमित्याशंक्याह॥ मनसेतिहियस्मात्देहकोमनसाभाव्यमानःसन्देहतांयातिदेहो ऐतत्कार्यकारीभव
तीति। अत्रयमुक्ताव्यतिरेकमाह देहभावनयेतिदेहभावनयामुक्तःपुरुषोदेहधर्मैःशीतोष्णमानावमानादिभिर्नबाध्य
तइत्येतत॥ ॥

कुत्रैतदुपलभ्यत इत्यत आह नान्तर्मुखतयेति ॥ अयमर्थः मनोभावनायां सत्यां शरीरे फलपर्यवसायिभोजनादिकार्यदर्शना
द्दृष्टत्वात्तस्यां निर्विकल्पकसमाध्यवस्थायां तद्दर्शनाच्च स्वप्नावस्थायां मनोमात्रात्मकशरीरकृतस्य दृष्टसादिफलपर्यव
सायिनो भोजनादेर्दर्शनाज्जाग्रत्स्वप्नविवेकेन शरीरकृततयोपलभ्यमानं फलवत्कार्यं स्वप्नशरीरकृतकार्यवत्तन्मनःकृ

नान्तर्मुखतया योगी देहे वेत्ति प्रियाप्रिये ॥ इंद्रस्याहल्यया सार्धं वृत्तांतोत्र निदर्शनं ॥ श्रीराम उवाच ॥ काहल्या भगव
न्निंद्रस्तत्र को वात्र संमतः ॥ ययोक्तं दंतश्रवणापावनी दृष्टिरीतिमां ॥ वसिष्ठ उवाच ॥ श्रूयते हि पुरा राम मागधेषु म
हीपतिः ॥ इंद्रद्युम्न इति ख्यात इंद्रद्युम्न इवापरः ॥ तस्येह विंबप्रतिमा भार्या कमललोचना ॥ अहल्या नाम तन्वंगी
सी शशांकस्येव रोहिणी

तमेवेति मन्वय एव च प्रियाप्रियकृन्न देह इत्येतमर्थं तन्निग्रहे प्रयत्नादेतिशयविधानायाख्यानान्तरेण स्फुटं ॥ कर्तुमाह ॥
इंद्रस्येति ॥ इतः षड्विंशमाख्यानसमाप्तिपर्यन्तो ग्रन्थसंदर्भः स्पष्टार्थः ॥ तत्र कानिचित्पदानि विविच्यन्ते ॥ उक्तो वृत्तांतः ॥ इंद्र
द्युम्न इवेति सर्वैश्वर्यमहत्त्वाज्जगत्यां द्वितीय इंद्र इव सन्नमः ॥ इंद्रद्युम्न इति ख्यातो विष्णुव्रतपरायण इति पुराणप्रसिद्ध एकोस्तीन्द्र
द्युम्नः अयं तु अपर इंद्रद्युम्न इव स्थित इत्यर्थः ॥ ॥

षिङ्गप्रकारशेखरः षिङ्गसमूहोत्तंसः ॥ अथ रत्नपतत्रबरागमकुत्रतमैदैः प्रकारैः प्रथितौ वद्धौ असमवातिघातोर्लणमध्य

तस्मिन्नेव पुरे खिंगः खिंगप्रकारशेखरः ॥ इंद्रनामापरः कश्चिन्नागरीणां प्रियो वसत ॥ साहल्याहल्यया सार्द्धमिंद्रस्य
यदभूत्पुरा ॥ तदाकर्ण्यैति हासेभ्यः तस्मिनिंद्रे रत्नपत ॥ तयोर्घनतरः स्नेहो निरावरणचेष्टयोः ॥ सुदुर्विनयदृष्टांतौ
राज्ञांतिकमुपाययौ एवमन्योन्यमासक्तं भावमालोक्य भूपतिः ॥ वकार वक्त्रभिर्भेदं दिस्सत यो रवशासनं तावुभा
वपि संत्यक्तो दुर्मती मलिलाशयेनुष्टौ जहसत्तस्त्र न खेदमुपजग्मतुः ॥ प्रथितौ गजपादेषु नतौ सत्रमुपागा
तौ ॥ कशाभिस्ताड्यमानां गोना पत्तः कामपिव्यथां द्वालाभिर्दह्यमानौ वौ स्थितौ हि मशिला स्विव ॥ अपृच्छत्तौ
तमो राज्ञा खिन्नौ वां किं नडुर्मती ॥ अथ तौ श्वरणीपालमूचतुर्मुदिताशयौ ॥ संस्मृत्यावामिहान्योन्यंमुखकां
तिमामनिंदितां ॥ ॥

मपुत्रषद्विवचनं स्थइति ॥ दुर्मती तिसंबोधनं ॥ आशयो वदितं ॥ ॥ ॥ श्रीगोपालायनमः ॥ ॥ ॥ श्रीरामायन

यो·टी ५८

58

शरी मी ॥३॥

अतीतेनाख्यानेन विस्तरेण प्रतिपादितमर्थं संक्षिप्याह ॥ एतत्ते कथितमित्यादिना सम्यग्विदिते हि संसाररोगनिदाने मनसि तच्चिकित्सा सुकरेति मत्वा तो रामः पृच्छति । विस्तरेणेति ॥ निराकृते वस्तुतो निःस्वरूपस्य तत्र हेतुर्जडस्येति । जडत्वं साधयति । अस्येति दृश्यस्येत्यर्थः । आरूढः संकल्पो येन तदारूढसंकल्पमाश्रितसंकल्पप्रधानमित्यर्थः ॥ यद्वा आरूढः संकल्पोप

॥ वसिष्ठ उवाच ॥ एतत्ते कथितं राम मयाख्यानकलीलया ॥ सर्वस्वजगत्यस्मिन्न द्वि शरीराः शरीरिणः ॥ एकं मनःशरीरं हि प्रकारि चलं सदा ॥ अकिंचित्करमन्यत्तु शरीरं मांसनिर्मितं ॥ श्रीराम उवाच ॥ विस्तरेण मम ब्रह्मन्जडस्यास्य निराकृतेः ॥ रूपमारूढसंकल्पं मनसो वक्तुमर्हसि ॥ वसिष्ठ उवाच ॥ अनंतस्यात्मतत्त्वस्य सर्वसक्तेर्महात्मनः ॥ संकल्पशक्तिरचितं यद्रूपं तन्मनो विदुः ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥

स्यतन्नथा ॥ अनिर्वाच्यमनःस्वरूपं दर्शयंस्तन्मन आसु प्रेरामत्तेः तच्चिन्तनादिलक्षणं मोक्षोपायप्रवणं कुर्यादित्याह । अनंतस्येत्यादि श्लोकत्रयेण । सर्वशक्तेः सर्वकारणभूता माया शक्तिर्यस्य यद्वा सर्वाः शक्तयः सर्वपदार्थनिष्ठतया प्रतीयमाना यस्मिंस्तन्नथोक्तं तस्य संकल्पशक्तिसंश्लिष्टं यत्कल्पितं रूपं तन्मनो विदुः ॥ छ ॥ ॥

यो॰ टी॰
५९

59

भावः पदार्थः। यद्वा भावशब्देनाभिप्रायं वा विनाभिप्रायकारणं लक्ष्यते। चलस्वभावतो लोलो लोकानां यो भावः कलनोन्मुखतां स
ङ्कल्पाभिमुखतां यातः सन् सदसतोर्मध्ये चलति॥ आत्मानात्मनोर्मध्ये डोलायते। मेलकत्वयुरन्ध्यानः मनोदर्पणमधिरू
ढो ह्यात्मानात्मनोर्द्रष्टृदृश्यभावं भजते। मनोलये सुषुप्तावात्मानात्मनोर्द्रष्टृदृश्यभावादर्शनाद्यतः कुतश्चिद् विचारितरमणी

भावः सदसतोर्मध्ये नृणां चलति चञ्चलः॥ कलनोन्मुखतां यातस्तद्रूपं मनसो विदुः॥ यतः कुतश्चिदुत्पन्नं चित्तं यत्किं
चिदेव हि॥ नित्यमात्मविमोक्षाय योजयेन्मुक्तियुक्तिषु॥ अत्रेदं चित्तमाख्यानं कथयामि तवानघ॥ यदाख्यातं भगव
ता पुरा पंकजजन्मना॥ ॥

यात्कारणात्॥ उत्पन्नमत एव यत्किंचिदेवाविचारितरमणीयमेव विचार्यमाणं छायाकल्पितवेतालवद्विशीर्य
ते। हि शब्दो विद्वत्प्रसिद्धिद्योतनार्थः। मोक्षयुक्तिषु। मोक्षोपपत्तिषु तच्चिंतनादिलक्षणामोक्षोपायेषु तद्योजयेत्। एवमविचा
रितरमणीयं विचाराद्विशरारु मन एव संसारकारणं तच्चित्तं नयेत् देवमोक्षयुक्तिषु योजनीयमित्युक्तम्। इदानीमेतमेवार्थं
चित्ताख्यानमवतार्य प्रपंचयति अत्रेदमिति॥ ॥ ॥

रम
५९
१०६

अस्ति रम्याटवी स्फारेति॥ गूढार्थप्रधानि भगवान् वसिष्ठः स्वयमेव व्याकरिष्यति। तथापि बुद्धिसौकर्यार्थं व्याकुर्महे। अटव्यां
नीवाहत्य अटवी संसारप्रदवी स्फारा विस्तीर्णा शून्या सर्वपदार्थवर्जिता॥ मायिकत्वात्तत्र पदार्थानामशाश्वतेति पदच्छेदः। अथवा त
मसत्त्वं दर्शयितुं शून्येत्युक्तं॥ साक्षिकत्वं दर्शयितुं साक्षेति। राजसत्वं ज्ञापयितुं मतिभीषणेति॥ पुरि शरीरे॥ शेते पुरुषः कसीदव्य
सीदतीति विग्रहः पुरुषो मनः सहस्रकरलोचनः अनन्तहस्तनयनः अत्रानन्त्वाविषयाकारस्थलस्थलोचनतयाविवक्षितानथ्यथोक्तं

अस्ति रम्याटवी स्फारा शून्या साक्षातिभीषणा॥ योजनानि शतं यस्यां लक्षनेकोटिमात्रकं॥ अमस्पको हि पुरुषः सह
स्रकरलोचनः॥ पर्याकुलमतिर्भीमः संस्थितो विकृताकृतिः॥ स सहस्रेण बाहूनामादाय परिघान् बहून्॥ प्रहरन्नात्म
नः पृष्ठं स्वात्मनैव पलायते॥ दृढप्रहारैः प्रहरन् स्वयमेवात्मनात्मनि॥ प्रविश्वति भीमात्मा शर्योजनशतान्यपि क्रं
दत्यलायमानो सो गत्वा हरमितस्ततः॥ अभवान्निवशाकारो विशीर्णचरणांगकः॥ ॥ ६ ॥ ॥

इह द्वाशिष्टे सहस्रनेत्रहस्तत्वं यत्पुंसा परिवर्णितं। तदनंतविकल्पित्वं हि चेतसः परिदर्शितमिति॥ बाहयष्टिना नानायोग्नीः ज्ञापयं
ति इति बाहवः कुकल्पनानि तेषां सहस्रेण परितो घ्नंतीति परिघा नाध्यात्मिकादि दुःखहेतुनादायात्मनः स्वस्य पृष्ठे प्रहरति॥ आ
त्मपरिगृहीतैराध्यात्मिकादिदुःखहेतुभिः स्वमात्मानं क्लेशयतीत्यर्थः॥ पलायिते कुकल्पनाप्रापितदुःखहेतुभ्यो बिभेतीत्यर्थः॥ ॥

यो॰टी
६॰

60

अंधो विवेकरहितः ॥ अंधकूपे गहननरके कुत्सितानि दुःखान्युपान्तेऽस्मिन्निति कूपे शब्दकुत्यत्नेर्नभोवद्गंभीरमपरिछिद्रं घं
कोटरं छिद्रं अभ्यंतरावकाशो यस्मिन्न सतथोक्तः ॥ तस्मिन् करंजवनगुल्मकमिति मनुष्यजन्मविवक्षितं ॥ नक्रमालापरप

पतितो वशएवास्मि इत्यंधोंधकूपके ॥ कृष्णरात्रितमोभीमेन भोगंभीनकोटरे ॥ ततः कालेन बहुना सोंधकूपास्स
मुत्थितः ॥ पुनः प्रहारैः प्रहरन्विश्वत्यात्मनात्मनि ॥ पुनर्दूरतरं गत्वा करंजवनगुल्मकं ॥ प्रविष्टः कंटकव्याप्तं श
लभाः पावकं यथा ॥ तस्मात्करंजगहनाद्दिनि क्रम्य प्रकृष्णाद्दिव ॥ पुनः प्रहारैः प्रहरन्विइवत्यात्मनात्मनि
पुनर्दूरतरं गत्वा शशांककरशीतलं

पर्पायकरंजवनगतगुल्मशब्दितं कुब्जोज्झित्वनवस्यासुखकरत्वात्कंटकव्याप्तं दुःखपरिवृतमित्यर्थः ॥ छ ॥ श्रीगोपाल

एम
६॰
१०८

कदलीकाननंस्वर्गस्त्रिद्वदशपातरमणीयत्वात्तवसिष्टशब्देनतेजउच्यतेअत्यर्त्थंचतेजस्वरूपोवसिष्टइतिवशिष्टशब्दभुत्यन्ने

कदलीकाननंकांतंसंप्रविष्टोहसन्निव।कदलीखंडकात्तस्माद्विनिःक्रम्यक्षणात्पुनः।स्वयंप्रहारैःप्रहरन्विद्रुत्यात्मनात्मनि।पुनर्हरनरंगत्वातमेवांधोधकूपकं।स्वंस्वंप्रविष्टस्तरयाविशीर्णावियवाकृतिः।अंधकूपास्समुत्थायप्रविष्टःकदलीवनं।कदलीकाननात्दश्वभ्रेकरंजवनगुल्मकं।करंजकाननानकूपंकुपाद्भावनोतरं।प्रविष्टःप्रहरनथ्रैवस्वयमेवात्मनिस्थितः।एवंरूपंनिजाचारंसमालोक्यचिरंमया।अवष्टभ्यवलादेवमुहूर्तंप्रतिवोधितः।पृष्टश्चकस्त्वंकिमिदंकेनार्थेनकरोषिव।किंववाभिमतंतेस्यात्किंमुधापरिधावसि।इतिपृष्टेनकथितंतेनमेरघुनंदन॥ ॥

वशिष्टवाचिनामयेतिशब्देनपरमोविवेकोविवक्षितः।विवेकेनवलात्प्रविश्यझटित्याक्रान्तमितीममर्थमाह।अवष्टभ्यवलदेवमुहूर्तंप्रतिवोधितइतिमुधापृथा॥ ॥

विवेकं प्रति चित्तेन कथितमेव दर्शयति ॥ नाहमित्यादिना ॥ मुने हे विवेका अविचारितरमणीयं हि चित्तं तत्कार्यादिकं
कं विवेकस्फुटितमसदेव भवतीत्यर्थः ॥ त्वया विवेकेन दृष्टो वशीकृतोऽहं दुःखाय सुखाय च नष्टोऽस्मि सुखदुःखोत्पा

नाहं कश्चिन्न चैवेदं मुने किंचित्करोम्यहं ॥ त्वयाहमवभग्नोस्मि त्वं मे शत्रुरहो बत ॥ त्वयाहं दृष्टोस्मि नष्टोस्मि
दुःखाय च सुखाय च ॥ इत्युक्त्वा चित्तं स्वान्यंगान्यालोक्यात्मा च तुष्टिमान् ॥ रुरोदातिरवं दीनो मेघो वर्षन्निव
रवीत ॥ क्षणमात्रेण तत्रासावुपसंहृत्य रोदनं स्वान्यंगानि समालोक्य जहास जगमभे विरं ॥ ॥

दत्तासमर्थोस्मीत्यर्थः ॥ अर्द्धभाग्याविवेकत्वात् भोगांस्मकुमशकुवत् ॥ चित्तं सत्तापञ्चकारेत्येतमर्थमाह रुरोदेति आ
समहत्पाख्यः शब्दो यस्य स ऋद्धारवी ॥ पूर्वाविवेकेन स्वान्यंगान्यहंकारममकारलक्षणानि बाधितान्यालोक्य प्राप्त
परमानन्दतया चित्तं संतोषं चकारेत्याह ॥ स्वान्यंगानि समालोक्येति ॥ ॥

प्राग्विवेकोदये सति सद्वृत्तिकं चित्तविलयक्रमं श्लोकत्रयेणाह ॥ अथाट्टहासपर्यन्त इत्यादिना मम पुरतो विवेकस्य समक्ष-
मित्यर्थः ॥ तस्य चित्तस्य शिरोऽहंकारलक्षणं ॥ तच्च परमदारुणं अतिभयंकरं ततोऽनन्तरं स्वाहवः कुकल्पनालक्षणाः पतिता ॥
पश्चाद् दर्पशिलालक्षणं वक्ष आदिकं पतितं ॥ तथा चोक्तं वृद्धवाशिष्ठे ॥ पदंगानि विशीर्णानि गतान्यन्तर्द्धिमग्रतः ॥ तत्किं तेन

अथाट्टहासपर्यन्ते संभ्रमात् पुरतो मम ॥ क्रमेण तानि तस्याङ्गस्वान्यङ्गानि समन्ततः ॥ प्रथमं पतितं तस्य शिरः
परमदारुणं ॥ ततस्ते वाहवः पश्चाद्वक्षः ॥ तदनु चोदरं अथ क्षणेन सप्तमान स्वान्यङ्गानि यथा तथा ॥ संत्य-
ज्य निपतते ॥ शङ्काख्या कापि गंबुसप स्थितः

विनार्थाशा शाम्यतीति प्रदर्शितमिति ॥ अत्रार्थाशाहंकारकुकल्पनयोरुपलक्षणानि ॥ यथा घृथं यथास्व पूर्वं स-
मन्वत इत्यर्थेऽभिधानादिदानीं यथायथमित्यभिधानाच्चायमर्थोऽवगम्यते स्वान्यङ्गानि यथास्वं पूर्वादिदिग्भ्यो बलिवि-
धायमत्तं समुद्घत इति ॥ एवं कथासो दर्पार्थमुक्तमिति ज्ञेयं ॥ निपतते देवस्य शङ्काविज्ञानाकारेणाभिव्यक्तरूपेत्यर्थः ग-
तुं समुद्यतो न गत इत्यभिधानाज्जीवन्मुक्तत्वस्य स्थिति ॥ ॥

पर्याकुलतरांतरं अत्यन्तं अपर्याकुलं अन्तरमभ्यन्तरं यस्य स तथोक्तः स्तां अलमत्यर्थं । अलसतामदृश्यतां यया विमुक्तया विदेह
मुक्तत्वं आवेदितं ॥ अथासौ सुचिरेणेति महापातकयुक्तं हि मनो अंधकूपशब्दितेन नरके पतितं सन्नस्मात्कूपादतिदीर्घेणापि
कालेन निर्गतमित्यर्थः ॥ बुद्धिलेशरहितं अनात्मज्ञमन्यनःस्वविवेकं तिरस्कारेत्याह दुर्मतिरिति दुर्मतिरसौ मामित्युक्त्वा स्व

दृष्टवानहमेकांते पुनरन्यं तथानंतरं ॥ प्रहरंतं घर्मं तं च पर्याकुलतरांतरं ॥ समयासं सखीकृत्य परिपृष्टस्तथैव हि ॥ तेनै
वासौ क्रमेणोवरुदित्वासं प्रहस्य च ॥ अंगैर्विशीर्णतामेत्य यथावलमलक्षितं दृष्टवानहमेकांते तथैवान्यं क्वचिन्नरं ॥ प
लायमानः पतितोऽहमत्यन्तांधे च कूपके ॥ तत्राहं सुचिरं कालमवसं स्तब्धतीर्थकः ॥ अथासौ सुचिरेणापि कूपाराग्नि सु
स्थितः शठः ॥ दृष्टवान् पुनरन्यं च प्रपतंतं मितस्ततः ॥ स्ववष्टभ्य स्तथैवाशु तस्य प्रोक्तं विरमया ॥ दुर्मतिर्मामसौ मूढो
नैव जानासि किंचन ॥ अपेहि दुर्मते सुक्त्वा स्वमापारपरोऽभवत् ॥ एवं तस्मिन्महाराराये बहवस्तादृशा नराः ॥ परिभ्रमं
तस्तिष्ठंति विद्यते घापि साध्वी

व्यापारपरोऽभवदित्यन्वयः ॥ इतिशब्दपरास्पष्टमाह ॥ हेत्यादिना । हे मूढ दुर्द्विज किंचिन्न जानासि एव अपेहि अपसर मत्स

साभीषरोति विविधकण्टकानां दुःखलक्षणानां संकटं संबाधो येष्वंगेषु तान्यंगानि यस्याः सा तथोक्ता बनतभिस्तानि
विज्ञानेन गहनाद्दुःप्रवेशा घनतमोगहनापि अनात्मनिजावबोधैर्लब्धात्मज्ञानैर्लोकैः प्राणिभिर्निर्वृत्तिमवाप्य

साभीषणा विविधकंटकसंकटांगी घोराटवी घनतमोगहनापि लोकैः ॥ आगत्य निर्वृतिमनात्मनिजावबो
धैरासेव्यते कुसुमगुल्मकवाटिकेव ॥ राम उवाच ॥ कासौ महाटवी ब्रह्मन्कुत्र वा दृश्यते नघ ॥ के च ते पुरु
षास्तत्र किं वा कर्तुं कृतोद्यमाः ॥ वसिष्ठ उवाच ॥ रघुनाथ महाबाहो शृणु वक्ष्यामि तेखिलं ॥ न सा महाटवी
राम दूरे नैव वने नराः ॥ सेयं संसारपदवी गंभीरपारकोटरा ॥ तां बृहच्छून्यविकाराढ्यां विद्धि राम महाटवीं ॥ तत्र
ते ये महाकाराः पुरुषास्ते भ्रमंति हि मनांसि तानि विद्धि त्वं दुःखे निपतितान्यलं ॥ इष्टायोद्यमहंते षांसवि
वेको महामते ॥ सया तान्यवबोधं लेविवेकेन मनांसि हि ॥ परं बोधं समासाद्य मत्प्रसादान्महामते ॥ मनांसि का
निचिद्विज्ञानि गतासुपशमं परं

सुखं लब्धाद्रासमंताज्ज्ञेयते ॥ गुल्मकानिरुद्धो न्निर्विशेषाः ॥ कासा सहाटवीत्यादिना सर्गसमाप्तेर्ग्रंथसंदर्भः स्पष्टार्थः क्व
चित्किंचिद्विविच्यते ॥ नैव च तेन राह रइत्यनुवर्तते ॥ श्चून्यविकाराढ्यां असत्कार्याढ्यां ॥ ॥ ॥ श्रीगोपा

करञ्जो मर्त्यमरुस्थलमित्युक्तं विवृणोति ॥ यत्र करजगहनमिति । कलत्ररसाविलं स्त्रीरा ॥ कलुषं विविधिन्नेना विषन्नयचिन्तेन ॥ तद

कानिचिन्नाभिनंदंति मां विवेकं विमोहिताः । मत्तिरस्कारवशतः कूपेष्वेव पतंत्यधः ॥ येते च कूपा गहना नरकास्तेरघूद्वह
॥ कदलीकाननं स्वर्गः करञ्जो मर्त्यमण्डलं । प्रविष्टान्पंचकूपोत निर्गतानि मयानि तु ॥ महापातकयुक्तानि नरके तानि सं
वदा ॥ यत्र करंजगहनं तत्कलत्ररसाविलं । दुःखकंटकसंबाधं माधुर्यं विविधैषणां ॥ यैरहं पुंभिरवधेद्धिन्ते तितिरस्कृत
ः ॥ तैर्मनोभिरनात्मज्ञैः स्ववीवेकस्तिरस्कृतः ॥ त्वया दृष्टोस्मि नष्टोस्मि शत्रुर्मेवमिति द्रुतं । यदुक्तं तद्विचिन्तेन ममताप
रिदेवितं रुदितं यन्महाक्रंदनरागाणां तत्र राघव ॥ तद्ध्योगजालं त्यजता मनसा रोदनं कृतं ॥ अर्द्धप्राप्तविवेकस्य न प्राप्त
स्यामलं पदं । मनसस्त्यजतो भोगान्यदितापोभिजायते ॥ हसितं तद्यदानंदि पुंसां यदवबोधतः । परिप्राप्तविवेकेन संतो
ष्येतसा कृतः ॥ ॥

ववोधत इति परद्वयं । अवबोधतो बोधनादित्यर्थः । पुंसामानंदि यद्धसितं तदवबोधतः । परिप्राप्तविवेकेन चेतसा सन्तोषः कृत इ
तियन्नदेवेत्यन्वयः ॥ ॥

रूपं विक्षिप्य संकल्पविकल्पलक्षणं अतीते प्रघट्टकतात्पर्यार्थमाह। संकल्पवासनाजालैरिति। संकल्पा एव वासनास्तलत्वाद्वा
सनास्तासां जालैः स्वैः स्वीयैः कोशकारक्रिमिर्हि कपित्थहृदादिसंलग्नः सन्नात्मनोवस्थानाय कोशं कृत्वा निर्गमनं द्वारस्यापि पि

परिधाय प्रविवेकस्य त्यक्तसंसारसंस्थितेः॥ चेतसस्सजतो रूपमानन्दो हि विवर्द्धते॥ यदासौ समवष्टभ्य प्रयाहृष्टः प्रय
त्नतः। तद्विवेको बलाच्चित्तमादत्त इति दर्शितं॥ यदात्मनि प्रहारौघैः पुमान्प्रहरति स्वयं। तत्तत्कल्पनाघातैः प्रहरत्या
त्मना मनः॥ पलायते यत्पुरुषः स्वात्मानं प्रहरन्स्वयं॥ स्ववासनाप्रहारेभ्यस्तत्र तत्र मनः स्वयं॥ संकल्पवासनाजा
लैः स्वैरेवायाति बंधनं॥ मनो लालामयैर्बंधैः कोशकारक्रिमिर्यथा॥ एतत्ते कथितं राम चित्तोपाख्यानमुत्तमं॥ वि
त्तेने वेदमालोक्य चित्तत्यागो स्थिरो भव॥ इति मोक्षोपाये चित्तप्रकरणं नाम दशमः सर्गः॥ ॥ ॥

धानं कुर्वाणो लालामयैर्बंधैर्यथा बध्यते तथेत्यर्थः॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यत्रमसुखशङ्करपादशिष्य
श्रीमदात्मसुखविरचितायां वासिष्ठचन्द्रिकायां उत्पत्तिप्रकरणे चित्तोपाख्यानं नाम दशमः सर्गः॥ ॥ ॥

अतीतसर्गान्तेमनोवंक्षनमायातिकोशकारकृमिवदितिदृष्टान्तोपादानात्मनसस्तमकृत्यभिधानान्नासतःस्त्पागायोगा
त्तस्यसत्यत्वंघाप्तंतत्सत्यत्वंप्राप्तंतत्सत्यत्वेवतद्विकारस्यजगतःसत्यत्वमितिसर्वस्यद्वैतस्यसत्यत्वमाशंक्यतस्यबालका
ख्यानवद्बुलेनतुच्छत्वंप्रतिपादयितुंप्रस्तावयति।प्रबुद्धानामित्यादिना।प्रबुद्धानांब्रह्मविदांइदंजगदाकारेणविजृंभमाणं
मनोब्रह्मैवनततोन्यदनन्यद्वा।किंतर्हिब्रह्मैवेत्यर्थः॥मनोब्रह्मेतिवाक्षायांसामानाधिकरण्यंहिशब्दःश्रुत्यादिप्रसि
द्धिद्योतनार्थः।उक्तोमनआदौब्रह्मतावन्मात्रमित्याशंक्यतत्कारणत्वात्तस्यतन्मात्रत्वेयुक्तमित्याह॥सर्वशक्तीतिसर्व

वसिष्ठउवाच॥ प्रबुद्धानां मनोराम ब्रह्मैवेदं हि नेतरत्॥ सर्वशक्ति परं ब्रह्म नित्यमापूर्णमव्ययं॥ नतदस्ति
नतस्मिन्यद्विद्यते विदितात्मनि॥ यथोल्लसति शक्त्यासौ प्रकाशं सोधिगच्छति॥ ॥ ॥ ॥

स्मिन्मनआदौकार्य्येसक्तिर्मायाख्यायस्यतत्तथोक्तं।सर्वासिद्धरूपःसर्वकार्य्यविषयायस्मिन्नितिवा॥अप्रमेयंअपक्षय
रहित।ननुविचित्रपदार्थानामथैकस्यचिद्ब्रह्मकार्यस्यापिसंभवान्नसर्वस्यब्रह्मतावन्मात्रत्वमित्यतआह।नतदस्ती
ति।विदितात्मनितस्मिन्अधिष्ठानेयत्कार्य्यंनविद्यतेतन्नास्ति।सर्वशक्तिपरंब्रह्मेत्यत्रयाःसर्वाःशक्तयोब्रह्मनिष्ठतयाअभि
हितास्तास्तत्कार्योपुरस्पष्टमुपलभ्यत्त्वइत्याह।यथोल्लसतिशक्त्येत्यादिना।असौपरमात्मास्वाश्रयाणांअनेकशक्तीनां
मध्येयथाशक्त्योल्लसतिविवर्त्तते॥ ॥

सासक्तिं कुत्रोपलभ्यत इत्यत आह। चिच्छक्तिरित्यादिना। उपले पाषाणे शून्यसक्तिरमूर्तनिष्पादनशक्तिः सद्यद्वितजातं प्रल
यकालेऽनभिव्यक्तनामरूपतया ब्रह्मरूपेण वर्तते उत्पत्तिकाले आघ्रेक्षणाः सर्प इव तस्माद्देवमाया विनःक्रमेण विज्ञंभते तत्रा
पिद्राष्टेरेव सृष्टित्वात्मन आदिक्रमेणेव विजृंभते। तद्यमन आदिकं द्वैतं अविचारदशायां बालकोपलालनायोक्तोऽसमञ्ज

चिच्छक्तिर्ब्रह्मणो राम शरीरेषूपलभ्यते॥ स्पंदशक्तिश्च वातेषु दार्ढ्यशक्तिस्तथोपले॥ द्रवशक्तिस्तथांभस्सु दाहश
क्तिस्तथानले॥ शून्यशक्तिस्तथाकाशे नाशशक्तिर्विनाशिनि॥ यथांडांतर्जले वह्नौ सर्वो तिष्ठति तथात्मनि॥ फल
पत्रलतापुष्पशाखाविटपमूलवान्॥ वृक्षबीजे यथा वृक्षस्तथेदं ब्रह्मणि स्थितं॥ ॥ ॥ ॥ ॥

सकथर्थइव सत्यवत्प्रतीयमानमपि तत्वनिरूपणे तुच्छमेवेत्येतदर्थं ज्ञानमाह फलपुष्पेत्यादिना लता कोमलशाखा अ
त्र विटपशब्देन पुनरुक्तताये वृक्षस्कंधो गृह्यते। ॥

कचिदिति ॥ तस्माद्ब्रह्मणः उत्पत्तिकार्यरूपेण प्रकाशत इत्यर्थः ॥ इमानलाद्भूतलात् । स आत्मा सर्वगो राम मेति । नित्योदित
महावपुः सर्वदा स्वयंभावपूर्ण आत्मा यघदा मनाक् ईषत् मननी मनन वतीं शक्तिं धत्ते विवर्त्तमानमननावछिन्नो भवती
त्ति यावत । तत्तदा मन इत्युच्यते आदौ मन इति समष्टिरूपं विवक्षितं । तदनु तदनंतरं बंधविमोक्षदृष्टी बंधमुक्तिज्ञाने उत्पद्य

कचित्कस्मिंश्चित्कदाचिच्च तस्माद्दृष्टेति सिद्धयः ॥ देशकालविधिचित्त्वात्मा नलाद्विशालयः ॥ स आत्मा सर्वगो राम
मनित्योदितमहावपुः ॥ यन्मनाक् मननीं शक्तिं धत्ते तन्मन उच्यते ॥ आदौ मनस्तदनु बंधविमोक्षदृष्टी पश्चात्
पंचरत्नभुवनाभिधाना ॥ इत्यादिका स्थितिरियं हि गता प्रतिष्ठामाख्यायिका सुभग बालजनोदितेव ॥ ॥

ते तयोस्तुत्यत्वौ भोगापवर्गार्थं स्वरूपसंभवश्च संगात् ॥ समर्थतिच भोगापवर्गार्थं स्वष्टिः । बुद्धीन्द्रियमनः प्राणाभ्यजनानाम स्व
अद्धिखः ॥ मात्रार्थं च भवार्थं च आत्मनो कल्पनाय चेति । आदिशब्देन विज्ञादिर्गृह्यते सुभगेति संबोधनं । एकं पदं वा सुभग
बालजनाय सुश्रीक बालजनायोदिताख्यायिका वदित्यादिका द्वैत स्थितिः प्रतिष्ठाम चलतया वस्थितिं गता । अविचारका
णो दृढसत्यबुद्धिविषयतां प्राप्तेत्यर्थः ॥ ॥

किमुच्यत इत्यादय आसर्गसमाप्ते सेयंथाः स्पष्टार्थः॥ क्वचित्किंचिद्विविच्यते मनोवर्णानिकारणमिति। सविलासं मनःखेद
मपि विचारोक्षितचेतसां सत्यवत्प्रतीयत इत्येवंविधस्य मनोवर्णानिस्य मनःस्वरूपबोधनस्य कारणं धात्रीउपमांतरं कथा

रामउवाच। किमुच्यते मुनिश्रेष्ठ बालकाख्यायिकाक्रमः॥ क्रमेण कथयैतन्मे मनोवर्णानिकारणं॥ वसिष्ठउवाच
कोपि मुग्धमतिर्बालो धात्रीं पृच्छति राघव कांचिद्विनोदिनीं वार्त्तां धात्री संकथयाथ मे॥ सा बालस्य विनोदाय धा
त्री तस्य महामते॥ आख्यायिकां कथयति प्रसन्नमधुराक्षरं॥ क्वचित्संति महात्मानो राजपुत्राः त्रयः शुभाः धा
र्मिकाः शौर्यमुदिताश्चात्यंतासति पत्तने॥ द्वौ नजातौ तथैकस्तु गर्भ एव हि न स्थितः। अथापि तु धनलाभार्थमेकदा
ते शुभास्त्रयः। स्वकीयाच्छून्यनगरान्निर्गत्या विमलाशयाः॥ गच्छंतो ग्पाने वृक्षान्ददृशुः फलशालिनः॥ तेषु
विश्रम्य विश्रम्य पक्वान्यास्वाद्य च फलं॥ ययुः सुखं विलासेन नते त्रयो राजसूनवः॥ ॥ ॥

याऽसमञ्जसत्वसिद्ध्यर्थं पृन्नरं विशिनष्टि अत्यंतासतीत्युक्त इत्यर्थः॥ आशयोभिप्रायः॥ ॥ श्रीगोपालायनमः

आसेडराजगमुः कल्लोलाडर्मयनैःमीलिलंसंजातमालंमालाकारैःकल्लोलैर्युक्त मित्यर्थः। मनागीषत संस्वःस्ना
तवल्तः पयोजलंसमुद्धापोमिथगवैर्भाषरां। हरतेश्चतंसमुद्धापोयस्प तन्नथा हरश्चतसमुद्धापं। खेलंनागरमं

मरित्रितयमासेडस्ततः कल्लोलमालिनं॥ तत्रैकापरिस्रुछैवमनागप्यंवु नद्वयोः॥ परिस्रुछाम्टशंयासौ
तस्यांनेसमुराहताः॥ चिरकृत्वाजलक्रीडांपीत्वाक्षीरोपमंपयः॥ अथासेडर्वनस्यांतेभविष्टंनगरंत्र
यः॥ हरश्चतसमुद्धापंखेलन्नागरमंडलं। ददृशुस्तत्ररम्याणिाणीएपथोभवनानिते॥ एकंनिस्तंभनिर्भि
त्तिअवलत्यत्रंगृहद्वयं॥ अभित्तिमंदिरंवाक्ष्प्रविष्टास्तेनृपात्मजाः। प्रापुःस्थालीत्रयंतत्रतभकांवनक
ल्पितां। तत्रखर्परतांयातेद्वेएकाचूर्णतांगता॥ जग्मुःचूर्णतायातांस्थालींतेक्षुद्भवुद्धयः॥ ॥ ॥

डलंक्रीडन्नगरभवनाणिाताहृशंमंडलजातंयस्मिन्नगरेतन्नथोक्तं॥ खर्परतांकपालतां॥ ॥श्रीगोपालायन

आषाढको रोग इत्युच्यते । तथा चोक्तं । फलं अर्कं च कंसुष्टिः कुडवस्त चतुष्टयं चत्वारः कुडवा प्रस्थश्चतुः प्रस्थमथाढकं ।
आषाढको भवेद्द्रोणो द्विद्रोणः सूर्प उच्यते । इति कश्चिद्विशेषः वस्तु आढको द्रोण इति व्यवहारः ॥ राजपुत्रैर्यद्द्रोणत्रयं पक्कं तद्द्रो

तस्यां द्रोणत्रयं पक्कं स्नानं द्रोणत्रयेण तु ॥ अर्धं भक्तं तो द्विजैर्भुक्तं निर्मुखैर्बहुभोजिभिः ॥ विप्रभक्ता वशेषं बुभु
क्षमं धोन्नपात्मजैः ॥ भविष्यं नगरे तस्मिन् राजपुत्रास्त्रयो हि ते सुखमध्य स्थितां प्रत्र म्हगया व्यवहारिणः ॥ चा
चेति कथिता राम वालभाख्यायिका शुभा ॥ तिस्रश्च यं संशयो वालो निर्विचारणाय धिया ॥ एषा ते कथिता राम
वालकाख्यायिका तव ॥ इयं संसाररचनाविचारोज्झितचेतसां ॥ वालकाख्यायिका वेत्यमवस्थितिमुपागता

राणत्रयेन स्वेनैव स्नानं । वालकाख्यायिका वेत्यमिति ॥ इत्थं वाल्पेख्यायिका वेत्ति संबंधं संकल्पेति ॥ ॥श्रीरामस

यो॰वी॰ ६०

67

समग्रंजगत्संकल्पजालकलनैवसंकल्पपुञ्जमात्रातिरेकेत्यर्थः।संकल्पजालकलनेतिकिलक्षव्यतेतत्राह।संक
ल्पजालकलनात्त्वितिफलितमाह॥संकल्पमात्रमिति।निर्विकल्पंनिर्विकल्पवस्त्वाकारं।यद्वानिर्विकल्पंनिशंसयंनि
श्चयंब्रह्मात्मविषयंशांतिंसंसारोपरतिं॥इतिश्रीमत्परमहंसपरिव्राजकाचार्योन्नमस्तखण्डपादशिष्यश्रीमदा

संकल्पजालकलनैवजगत्समग्रंसंकल्पजालकलनात्त्वमनोविलासः।संकल्पमात्रमलमुत्सृजनिर्वि
कल्पमाश्रित्यनिश्चयमवाप्नुहिरामशांतिं॥इतिमोक्षोपायेउत्पत्तिप्रकरणेवालकाख्यायिकोपाख्या
नंनामएकादशःसर्गः॥वसिष्ठउवाच॥स्वसंकल्पवशान्मूढोमोहमेतिनपंडिताः॥धियाविचारध
र्मिणामोहसंरंभहीनया॥विचारयधियासत्यमसत्यंहिपरित्यज॥ ॥

मू॰ ६०

११८

तत्सुखबद्धतौवासिष्ठचंद्रिकायांउत्पत्तिप्रकरणेवालकाख्यानंनामःएकादशःसर्गः॥पूर्वसर्गाभिहितनिर्वि
कल्पनिश्चयाश्रयणायकिंकर्तव्यमित्याशंक्यसत्यादिलक्षणब्रह्मविचारःकर्तव्यइतिमोपपत्तिकमाह।स्वसंक
ल्पवशादित्यादिनासार्द्धेन।विचारस्वधर्म्मोधर्म्मवत्सदानुबंधोयस्यास्तयामोहसंरंभहीनयामोहाडंबरहीनया।धी
यापरिशोधितोमोहंनेति॥ ॥

...द्दोहम्याशाकुलइव किंकु...भिधान...वद्धइत्यादिना सुधा...लि...मल वशास्यय शांस्येव कुसुमां तंसाम्रेप्ये...
...ह्वास मात्र विजंभणामा...नु वस्त...हित...वहू...स्कंध मउला:। ऋसिद्धहिलोके कुसुमान्नमै: परागपान
गो: पदमितिस्वासु संबंधिनी सुलीलासु प्रवर्द्धमानस्य चेतसो घो...गा: दिग...व्याप्त...रितितात्यर्थ:॥ जिस्रतांका

अवद्धोवद्धइत्युक्ता किंसुधापरि शोचसि अनंतस्यात्मतत्वस्य...रा: प्रोद्धूलिता इवाभिह...तांजो न जानातिन हृ श
कस्यपि...स्थिते द्वितीयस्याभावात् कोबद्ध: कश्चमुच्यते तस्मा...विभ्रमा स्थाने सिंहासन गतो भवेत्। सुरलोप
एममोरुएवावशिष्यते॥ गोष्पदं योजनस्फूइ: स्वास्थु लीला...मेन्द्रजालिक: सननाम महीपालं चिरवरोध
अत्रते...णु वक्ष्यामि वृत्तांतमिममुत्तमं जागती इंद्रजालश्री...वभो ताव देवा मिहरवरोलिकां। पीवस्थ...सा
ठेनानावलसमाकुल:। उत्तरा:पांडवो नाम स्फीतो जनपदो म...येवंद्रोदयमिवावनौ॥ ॥
...इकुलो भूतो म...भाविव...मितिव्यतोस्मिन्...सिगम्यीत्यादिना...क्त:॥ उदारतादात
...समभियोगोष्पदमपियोजन...होभवतीत्यपि...हस्पते...वासाटोपसंसंभ्रमं। शिखरं...तकंडदाराख...मा
पिधव्यति। मायामयं मनइत्युक्तमर्थमारव्यानमव...र्यविशद...नारवरोलिकेत्यत्र इंद्रजालविद्याभ्यासोचितवद्भिः
...स्यान्नर्थयायेन प्रकारेणास्थिता तथा...सीति...स्फीत:

का॰टी॰
६८
68

ज्ञंसः शेखरः यथाहं श्रीस्वामिनः॥ शोभते शिरसि शेखरज्ञंसो ॥ भा॥ वस्तुतो वंधासंभवे फलितमाह। तस्मादिभिमनो
राशिः॥ कुंभ्राणि स्कंधमंडलानि जेषां तेयघसः कुसुमोत्तंसपांडुर ॥ ाः कथं संभवतीत्यासंक्य तदर्थं तस्पडघटकारितमाह
नास्कंधमंडलानि पांडुराणि भवंतीति प्रोद्भूलिताविमलीक ॥ ानस्नहागोथ्यदंभवत्तिप्योजनसमूहोपिगोष्ठस्वतगो

यद्यशः कुसुमोत्तमपांडुरस्कंधमंडलं सर्वशैलाविराजते ॥ किं कथं केन वाध्यते अनंतेकिइनानंदेनि विकिमे
द्येनगरश्रेता॥ उदारतायेन ष्टतावाचकेन यथाभिधा॥ सक ॥ इहना समार्यंबुमनसोवंधतां गतं। मनः जशमने
विष्टे तत्रास्मिं राजतीश्चविंबांबरे॥ सभो विवेशसाक्षेयं कीर् ॥ यंतसः। कल्पं रूणीकरोत्यंतः करणं नयति कल्पतो
रकधरं॥ ठवाचोत्कंधरं रूपं सपद्म मिवषघदः॥ विलोकय ॥ वितः स्यातः स्यिवायथा अस्मिन्स्मिन्वसुधापी
ज्ञान॥ तत्रास्ति लवणो नामराजा परमधार्मिकः॥ हरि

यद्यांगरम्भुरभिकांशाशील तस्यभावोगरश्रेतास्म्भुरभिकोङ्काय ॥ दिवाकरः॥ ॥
तावामहत्त्वं वावादकेनवक्त्रा अभिधानअभिधास्यायोध्यापा ॥ हेश्वमादौ देशकालदेशादिविभ्रमः। अद्यहमानम
कंधरा श्रीवायस्यसतश्लोकः॥ तां अत्कंध खंडत यीः एकांप्र ॥ …लेषुणिवत्यादिना। जागतीजा॥ संबधिनीचित
तरसहोजनपदादेशाः॥ ॥ ॥

पिच्छिकात्रमयूरपत्रभारः नानाविरचनावीजं नानानिर्म्माणाकारणं। ततः पिच्छिकादनंतरं अस्मिन्नेव क्षणे सैंधव
शामन्तः सिंधुदेशीवत्रपसामन्तः सभाविवेशातं सामन्तम् अश्वस्यानुजगामेति राज्ञो वर्तिविस्मृतेत्यर्थः॥ एवमन्यत्रापि

इत्युक्त्वा पिच्छिकालेन भ्रामिता भ्रमदायिमी। नानाविरावनावीजं मायेव परमात्मनः तां तद्दर्श महीपालस्तेजो।
रेणुविराजितो सभां सैंधवसामंभो विवेशास्मिन् क्षणे तदा। तं चैवानुजगामाश्वसौम्यः परमवेगवान्। सामं
तोऽथ सुपादाग्रपार्थिवस्समुवचह। इदमुच्चैश्रवः प्रख्यं हयरत्नं महीपते प्रभुणा मम मत्स्यकप्रभोसंप्रहितं तव।
राजते हि पदार्थश्री महतामर्पणाच्छुभा॥ इत्युक्तवति तस्मिन् सप्रस्तुवाचेंद्रजालिकः। स दृश्वमेनमाश्चर्यसुवनं
विहरप्रभो। अश्वमालोकयामास नेत्रे नो क्ष्मीति भूपतिः॥ अथानिमेषयादृष्ट्या राजा चित्रोपमाकृतिः। विस्मृ
त्यालोकत्रयेशस्स्वं लिपिकर्मार्पितो यथा तस्थो मुहूर्त्तयुग्मं तु ध्यानासक्त इवात्मनि॥ ॥ ॥

ज्ञेयं उच्चैश्रवाः इंद्रस्याश्वस्तत्प्रख्यं तत्संकाशं संप्रहितं संप्रेषितं युग्मं युगलं॥ ॥श्रीगोपालायनमः॥

सभासदः सभायां वर्त्तमानाः विततं विस्मितं महान् विस्मयो यस्यां जिह्मतायां ऐंद्रजालिककुटिलतायां सा विततवि
स्मितजिह्मता तयाह्खिन्नतयाभ्रमिपतोत्स्तिमितचक्षुषि स्थिते सति भयमोहाभ्यां विषण्णया दुःखितया जनतया जनस

ततस्ते विस्मयापन्ना बभूवुः स्थितास्सभासदः॥ संदेहसागरे मग्नाः स्थिताः तत्र च मंत्रिसमः। प्रशशाम सभास्थाने ज
नकोलाहलो महान् विततविस्मितजिह्मतयात्तया जनतया भयमोहविषण्णया। स्तिमितचक्षुषि भ्रमिपतोत्स्थि
ते मुकुलिताम्बुवनस्य श्रताकृतिः॥ ॥वसिष्ठ उवाच मुहूर्त्तद्वितयेनाथ प्रबुद्धोऽथ महीपतिः॥ बभूवाथ प्र
बुद्धः सोऽवासनोपरि कंपितः प्रारेभे हार्यमाणोथ पर्याकुलमतिर्नृपः॥ अथैनं परिपप्रच्छुः सदस्याः संत्रिणस्त
दा। सम्पकृत्यासप्रबोधं तं सादरं विनयान्विताः॥ मनस्तो निर्मलं कस्मात् भ्रमेषु निमज्जति मनो मोहस्तु पा
हन्तेन महत्त्वं विजृंभितं॥ अथ राजा हसत्याश्चर्यमुन्मीलितविलोचनः इदमाश्चर्यमाख्यातं श्रूयतां घ सभासदः।
पिञ्छिकाया महन्मालोक्य जालेन भ्रामितामिमां अश्वमारुह्य वातेन भोलेना भ्रांतचेतसां गत्वा प्रदेशोऽरण्यमे
कोऽहमतिरंहसा। अनेनातिविलोलेन दूरं नीतोस्मि वाजिना॥ ॥

दुःहेन सकुलिताम्बनस्य कृतिः शोभा दृष्टगजानेनासमीक्ष्यकारिणा शाल्मोऽ समीक्ष्यकारी स्यादित्यमरः॥ अतिरंहसा
अतिवेगेन॥ ॥

भोगाभ्यासेन नैवैषयिकसुखानुभवाद्दृष्टा जडत्वेतोन्यपुरुषार्थानिमित्तं भोगाभ्यासजडत्वं तेनाज्ञो नाम मज्ञः मुग्धः पशुवदज्ञो किं कज्ञतया
पिहीनः स्फारोद्धुरिनीहारस्तुषारायेयस्मिन्नरण्ये तत्तथोक्तं॥ आसूर्यप्राप्तिमयपर्यन्तमित्यर्थः॥ प्रक्रान्तंप्रकर्षेण॥ इतिजंगलेव

भोगाभ्यासजडेनाज्ञो मुग्धः स्वमनसा यथा॥ ततः प्रलयनिर्दग्धं जगदास्यदभीषणं निःपक्षिस्फारनीहारनिर्द्रुमज
लमहत॥ संप्राप्तोहमपर्यन्तमरण्यं पश्रान्तवाहनः तदरण्यमध्यासाद्यमतिर्मे खेदमागता॥ आसूर्यान्तदिनं तत्र प्रक्रान्तं सी
दतामया तदरण्यमध्यातीतमतिकृच्छ्रेणखेदिना विवेकिनेव संसारः आप्तवानथ जांगलं जंबूकदंबप्रायेषु कलाला
पाः पक्षिणः यत्र स्फुरंति खंडेषु पांथानामिव बांधवः तत्र जंबीरखंडस्य तलं संप्राप्तवानहं॥ आलंबितामयातत्र स्कंध
संसर्गिणी लता मपि प्रलंबमानेस्यां प्रयातः स्वतुरंगमः गंगावलंबिनि नरे यथा दुःकृतसंचयः॥ विरदीर्घाध्वगः
खिन्नस्तत्र विश्रान्तवानहं तत्र कल्पसमा रात्रिर्मोहमग्नस्य मे गता नस्नातवान्नार्चितवान्न तदा भुक्तवानहं केवलं
दुर्गता रात्रिः सा पदांबुरिति श्रुतः॥
न विशेषः जंबीरो दन्तशठास्यो वृक्षः लता शाखा लजा मागरवाच॥ शाखिना मित्यभियुक्त वचनान्त सा रात्रिः सापदामित्येकं प
दं वा कृशिमारे॥ ॥

रा-टी
८०
70

शीतार्त्तमदन्तपंक्तिटंकारसीत्कृतैः शीतार्त्तमदन्तपंक्तौ ये टंकाराः यानि च सीत्कृतानि सीत्काराः तैः सह तिमिरसंघातैः खस
ई सर्व्वरी रात्रिर्व्यतीयाय व्यतिक्रांता ः भूत ॥ भूतं प्रणिजातं जरवज्जंगले जीर्णवनविशेषे खंडभ्रमणं सकलभ्रमणं विचीकुर्वीति

शहशीतार्त्तमदन्तपंक्तिटंकारसीत्कृतैः ॥ सार्द्धं तिमिरसंघातैः साव्यतीयाय सर्व्वरी यत्र त्वत्तामहं स्फारां संप्रवृत्तं स्त
तस्थलीन किंचिद्दृश्यपनेत्रं भूतं जरठजंगले ॥ अभिजातोयणालयो यथा मूर्खशरीरके केवलं विगता शंकं खंडभ्रम
णं चंचला ॥ वीचीकुर्वीति वचना विहरंती विहंगमा ॥ अथाष्टभागमापन्ने व्योम्नो दिवसनायके दृष्टा मया प्रभ्रम
तादारिकौसदनधारिणी तरत्तारकनेत्रांतां रूपामामधवलांवरा अहमभ्यागतस्तत्र शर्व्वरीमिव चंद्रमाः ॥ मद्यमोद
नमाध्वेतद्दाले वलवदापदि ॥ देहि दीनार्त्तिहरणं श्लाघ्यतां यातिसंपदः ॥ कुर्दंतं मर्हतीयं मे वाले ह्येषी स्वपेयुषी ॥ ॥

शहात्तकारः ॥ त्रिंशद्भागस्य व्योम्नो ऽष्टभागे देशे दिवसनायके रवावापन्ने प्राप्ते सतीत्यर्थः ॥ दारिका वालिका ॥ तारका कनीनि
कानेत्रमध्यस्थकृष्णमण्डलरूपाणि । तरत्तारके परिभ्रमन्कनीनिके नेत्रे यस्याः सा तथोक्ताः स्फारवांग्भूरितां गपेयुषीं गपयाता

राम
८०
१८

चंडा तद्वक्षादीनां सम्मूहा दृश्यते षराडं निपततीति सप्तमी हारकेयूरीति नाम कुंज केषु नि कुंजेषु फलादिणि इच्छया निषजं त्या नित

याञ्जपापितयामस मित्यं दत्तं न किंचनायन्नत्वार्थनया लक्ष्मापथाऽङ्कृतिनेषनं । केवलं विनकालेनमयत्यंताद्गुणा
मि निः खंडं त्वं दनिपतितिच्छायाम् तेपुरः स्थिते ॥ तयोक्तं हारकेयूरी चंडाली विद्धिमामिति । राजन्याचनमात्रेणाम द्योना
न्नोषिभोजनं । इत्युक्तवत्यागच्छंत्या बलं त्याचपदेपदे । कुंजकेभुरिमज्जंत्याली लावनितयोदित । ददा भिभोजनमि
दं भर्ता भवतित्येवेत्ममावाहयत्यत्रमेदांताबुद्धालेपध्कसः पिता तस्येदमन्नं भवति भर्तृविदीयते स्थिते प्राणेरपिहि संश्रुत्वा
वद्धभाः पुत्रभायतः । अथोक्ता सामयाभर्ता भवामितवसुव्रते केनापदि विचार्यते वर्णजातिकुलक्रमाः ततस्तपोदत्तादर्द्धं
मद्यमेकं समर्पितं । निंबूफलरसः पीतसंयुक्तः पक्कणोदनः ॥ ॥

रीसंगं कुर्वत्या कुंजके षितिकवित ॥ तत्रस्वकरावगतेषु वाहेषु वागुंजां फलेष्वित्यर्थः दात्तोदमयुक्तौ शिक्षितौ वलीकर्द्दौ उद्दालेदले
नाकृष्टेकृत्रभवतीति सप्तमी ॥ ॥

यो॰ टी
७२

71

पक्कणशब्दे नं शबरालयवाचिना उपलक्षणं गृहं लक्ष्यते पीवराकारं पीनाकृतिं। अविवीर्नरकविशेषः॥ मातंगः श्वपाकः चंडालस्तव
मप्राद्दिवाकीर्त्तिर्जनंगमा इत्यमरः॥ बाढमित्यव्ययमंगीकारे॥ नीहाराभ्रकडारासु नीहाराणि तुषाराणि खषाणि संध्याभ्राणि तैः कडा
रासु कपिलासु कडारः कपिलः पिंग इत्यमरः॥ दिङ्मुखोद्धूलितस्विव सतीषु चलितासु इति संबंधः॥ वेतालाबध्यंतेऽस्मिन्निति वेताल

विश्रांतं च मया तत्र मोहात्पक्कणचेतसा मां हस्तेनाथमादाय प्राणं वहिरिव स्थितं उराकृतिं उराचारमासमादभयप्रदं। पितरं
पीवराकारमवीचिमिव यातना तयाहमनुषंगिण्या मातंगाय निवेदितः अयं मम भवेद्भर्त्तेति तातहे तवोरदत्तां। सत स्थावा
ढमित्युक्त्वा दिनं तेन समुपस्थिते मुमोच दंता वा वद्धोक्षतां तः किंकराविव॥ नीहाराभ्रकडारासु दिङ्मुखोद्धूलितस्विव। वेता
लबंधनात्तस्माद्दिनांते वलितावयं रूणोन पक्कनं प्राप्ताः संध्यायां दीर्घजंगलात् विकर्त्तितवराहाश्वकपिकुक्कुटवायसांशे
षार्थाप्रसृतार्द्रत्रांत्रीजालपतत्खगं॥ ॥

बंधनं वेतालस्थानं वनं तस्मात् दीर्घजंगलं वनविशेषः पक्कणस्थलक्ष्रुण्या पुष्कसालयस्थत्रीणि विशेषणानि विकर्त्तितेत्यादीनि वि
कर्त्तिता विविधं छेदिता वराहादयो यस्मिन्नसत तथोक्तं अंत्राणि पुरीतन्त्र शिराः शेषणार्थं प्रसृतानि प्रकीर्णानि आर्द्रत्राणितान्येव तं
त्वंशे षार्थं प्रसृतार्द्रत्रतं असतासां जाले पतंतः खगाः पक्षिणो यस्मिन्नसत तथोक्तं॥ ॥ ॥ श्रीगोपालाय नमः॥ ५

एप
७१
११८

क्रव्यमामिकं। पलं क्रव्यमामिषमित्यमरः॥ वालहस्तस्थितेषु क्रव्यपिंडेषु क्कणिता ध्वनिता मक्षिका यस्मिंस्तत् तथोक्तं उपहितं प्रक्षिप्तं
केकराक्षीति नाम। कल्माषवर्णेनेतेनेति पूर्णेनान्वयः। ससरंभं ससंभ्रमं सवेगम्वा अभितः उभयतः विनेडुः विशिष्टं नादं चक्रुः म

वालहस्तस्थितक्रव्यपिंडक्कणितमक्षिकं संभ्रमोपहतानल्पकदलीदलखंडके अहमास्थितवांस्तत्र नवे श्वसुरमंदि
रे। श्वश्रा मे केकराक्षाख्या तेनासृङ्मयचक्षुषा जामातायमिति प्रोक्तं तया तदभिनंदितं वहुनात्र किमुक्तेन कस्मिंश्चिद्दि
वसे ततः। दत्ता च तेन सा मह्यं कुमारीभयदायिनी मुक्ताब्जाकल्माषवर्णेनडुः कृतेनेव यातना सरभसमभितो विनेडुरत्र प
स्रुतमहामदिरासवाश्वपाकाः हतपड्यन्हाविलासवंतः स्वयमिकडुः कृतरासयोमहांतः राजोवाच ततः प्रभृति
तत्राहं संपन्नः पुष्टपुष्कसः सप्तरात्रोत्सवस्यांते क्रमान्मासाष्टकं गतं॥ ॥ ॥

दिरा आमवश्च मदिरासवाः प्रस्रुता आस्याद्विगलिताः महान्तो मदिरासवा येषां ते तथोक्ताः आसवः सुरा मदिरा अन्नसा
डरसासुराः यथाह क्षीरस्वामिनः स्वादुरसा मदिरेति श्वपाकाः श्वपचाः॥ ॥

यो॰वी ७२ पुष्पितासमता उज्ज्वलाजाता पीवरापीना दृष्टावासोवृद्धिरेतिदुर्बुद्धिः आशाएव पाशा बंधनहेतुत्वात॥ तेषांविधायक
७२ मुत्पादकं आशापासविधायसमाः संवत्सरान्दशान्तरेकालावस्थामदेदशान्तरेशीतवातातपक्लेशविवशेनेतिसंबंधः

७२

पुष्पितासाभिसंपन्नास्थिता गर्भवतीततः प्रसूताउःखदांकन्यांविपडः खक्रियामिव साकन्यावदृधेशीघ्रंमूर्खे
विंतेवपीवरीपुनः प्रसूतासावर्षैस्त्रिभिः पुत्रमशोभनं अनर्थमिवदुर्बुद्धिराशाय शविधायकं पुष्कसीसाप्रसूताथपुनरष्ट
र्भकंततः तयासहसमास्तत्रमयावध्योनिवाहिताः शीतवातातपक्लेशविवशेनदशांतरे कलत्रविंताहतयाधियासंदग्धमा
नयादृष्टाःकष्टसमारंभादिशःप्रज्वलिताइव अथागतेतिकालेवनगतनर्जरिताख्यधि तरणोच्छ्रदहनज्वालासमन्भस्मघरेमपि
तत्रउर्मिक्रिमासीद्वपरिशुष्कतरणंमहत अकांडमरणोडीनंचंडचंडालमंडलं॥ ॥ ॥

तरणोत्थेतितरणोत्थज्वालानिज्वालाहिश्वेतामवह्नि। अकांडमनवसरोडर्मिकृकालस्तत्प्रयुक्तमरणांअकांडमरणांतस्मान्निमित्तात्त
डीनमुड्डतंचरणमतिकोपचरणस्त्वत्यंतकोपनरत्यमरः। अकांडमरणोडीनंचतडंडचंडालमंडलंवेत्तिविग्रहः॥ छ ॥ छ ॥

राम ७२
११९

विंध्यकच्छं विंध्यपर्वतस्योदकबहुलप्रदेशं उदप्रायमनूपंस्यात्पुंसि कच्छस्तथाविधइत्यमरः। कीदृशं तदकाण्डमित्यत आह।
भीममित्यादि। उद्दामो विवंधनो दवपावको वनाग्निर्यस्मिंस्तत् उद्दामदववावकं उत्पलतालताप्रतानानी वीरुद्गुल्मिन्युलुप

निरन्तरतृणपत्राम्बु विंध्यकच्छं तदा ययौ नवर्षति वनव्राते दृष्टे नष्टे क्वचिज्जने पौरंभारगणे ध्योम्निगतौव
हतिमारुते अकांडमथ भीममुद्दामदवपावकं शोषिताशेषगहनं भस्मशेषतृणोलुपं तस्मिंस्तदा वर्तमाने
कष्टे विधिविपर्यये। जनाः केचिद्विनिःक्रम्य गतास्तु ससुहृज्जनाः शीर्णाः केचन तत्रैव प्रविष्टा अनलं परे केचिच्च
श्वभ्रेषु पतिताः केऽपि जातास्तु म्रर्खवः॥ ॥

मित्यपीत्यमरः भस्मशेषाणि तृणोलुपानि यस्मिंस्तथोक्तं विधिविपर्यये वैरागपरीत्ये श्वभ्रेषु विवरेषु॥ श्रीगो

कष्टादापासातउल्वणा नम्रयक्ता नस्फुटं प्रव्यक्तमुल्वणमित्यमरः॥दारकौवालकौदारकौवाल भेदकादित्यमरः धितः॥

योसी
७३

73

अहंकलत्रमादायकृच्छ्रात्तस्माद्विनिर्गतः सार्द्धत्रिभिरपत्यैस्सुतयाचसहितैस्तनैः प्राप्यतद्देशपर्यंततत्रमालतरो
स्तलेश्रवरोप्यसुतांस्कंधाल्लाननर्धानिवोल्वणात विश्रांतोस्मि ततस्तत्ररौरवादिव निर्गतः अथवंगलकन्या
यांविश्रांतायाधरातले सुप्तायांशीतलच्छायेद्दोसमालिंग्यदारको पृच्छकोनामतनयोममेमपुरतःस्थितः अत्यं
तंवल्लभोस्माकंकनीयान्ममबांधवानिति समास्वावदीनात्मावाष्पपूरितलोचनः तातदेहास्मिमेमांसंपाद्यंवक
धिरंकृपणात पुनःपुनर्वदन्नेवंसबालस्तनयोमम प्राणांतिकीदशांप्राप्तःसाक्रंदोहिपुनःपुनःतस्यतामा
र्त्तिमालोक्यमयाऽदुःखातिभारिणा सोढुंतामापदंतीव्रामशक्तेनहतात्मना मरणायाग्निमित्रायकृतोंतर्नि
श्चयोमया तत्रकाष्ठानिसंचित्यचितामाविन्नवानहं।चिताचट्चटास्फोटैःस्थितामदभिकांक्षिणी तस्यांउ
यावदात्मानचितायांनिक्षिपाम्यहं॥चलितोस्मिजवात्तावदस्मात्सिंहासनान्नृपः ततस्तूर्यनिनादेनजयशब्दे
नवेष्टितः॥ ॥

राम
७३
१२०

साम्बरिकेणऐंद्रजालिकेन मनोविवर्त्तत्वात्तु गतो मनोजगदिति सामानाधिकरण्यमुपपन्नं॥ ॥इति श्रीमत्परमहंसपरिव्राजकाचार्योत्तम सुखप्रकाशपाद श्रीमदात्मसुखकृतौ वसिष्ठचंद्रिकायां उत्पत्तिप्रकरणं नाम द्वादशः सर्गः॥ ॥सांबरिकाख्यानं एवं नानाख्यानैः परमात्माश्रयमायाविवर्त्तभूतमनोविलासं संसारात्मकं द्वैतानर्थजातं मिथ्या तदधिष्ठानं ब्रह्मात्मतत्वमेव सत्यमिति

इति शांबरिकेनायं मोह उत्यादितो मम अज्ञानेनेव जीवस्पद थाशतसमन्वितः इत्युक्तवति राजेंद्र लवणे भूरितेजसि त्वं तद्दर्निजगामासौ तत्र सांबरिकः क्षणात्॥ अत्रेदमूचुस्ते सभ्या विस्मयोत्फुल्ललोचनाः नायं शांबरिको देव यस्य नास्ति धनैषणा दैवी कांचनमायेयं संसारस्थितिबोधिनी मनोविवर्त्तः संसार इति यस्यां प्रतीयते॥ सर्वशक्तेरनंतस्य विलासो हि मतो जगत्॥ ॥इति शांबरिकोपाख्यानं नाम द्वादशः सर्गः वसिष्ठ उवाच यत्कृतं मनसा राम तत्कृतं विद्धि राघव यत्त्यक्तं मनसा तावत्तत्त्यक्तं विद्धि चानघ॥ ॥

प्रतिपादितं इदानीमेव प्रतिपादनात्॥ तत्त्यक्त्वापि ब्रह्मात्मतत्वप्रतीतिश्चित्तैकाग्र्याभावाद्दृढभवपर्यवसायिनी न भवतीयतो तत्तदेकाग्र्यसिद्ध्यर्थं तस्य बाह्यवृत्तिनिरोधाः कर्त्तव्य इति तत्र तत्र प्रतिपादितमपि इह विशेषतः प्रतिपादयितुमाह॥ यत्कृतमिति नामशब्दः प्रसिद्धौ॥ ॥

यो॰ टी॰
७४
75

अचपलतां अचंचलतां॥ अचपलतां याता तत्त्वमेवाह॥ मननवर्जितमिति संकल्पादिवर्जितमित्यर्थः। असौ पुमान् अखण्डमप-
देन सर्वात्मनोपायेन ध्यानेन चितस्य चिन्मात्रशेषता लक्षणेनानुगतोन्वितो भवति। अतो महाफलत्वान्मनसो चापल्यं
सम्यग्भावनीयमित्यर्थः॥ ननु ध्यानफलेनापि मनसो चापल्ये न संसारान्मुमुक्षोः किं भवेत्तत्राह। संयमादिति अस्पंदतामितिष्ठे

यस्याचपलतां यातं मनो मननवर्जितं अखण्डमपदेनासौ ध्यानेनानुगतो नघा संयमान्मनसः शांतिमेति संसारवि-
भ्रमः। मंदरे स्पंदतां याते यथा क्षीरमहार्णवः मनसो वृत्तयो याया भोगसंकल्पविभ्रमाः संसारविषवृक्षाणां ता एवांकुरपं-
क्तयः। अस्य चित्तमहाव्याधेश्चिकित्सायां परौषधं स्वाधत्नं शृणु वक्ष्यामि सुखसाध्यसुनिश्चितं त्यक्त्वाभिमतं वस्तु यस्ति-
ष्ठति सुनिश्चलः जितमेव मनस्तेन वाह्यं प्रसरमुज्झता॥ ॥ ॥

दः शब्दाद्याकाराणां चित्तवृत्तीनां सांसारिकदेहशतहेतुत्वं प्रदर्शनपूर्वकं तन्निरोधोपायमाह मनसो वृत्तय इत्यादि श्लोक-
त्रयेण भोगविषयषट्कल्पा एव विभ्रमाः भोगसंकल्पविभ्रमाः तैर्हेतुभिर्जायमानाद्या मनसो वृत्तयः शब्दादिविषयास्ता एवेत्य-
न्वयः॥ ॥

राम
७४
१२१

औषधस्यपरत्वमेवसाधयतिस्वायत्तमित्यादिनालोके किंचिदौषधंसहायम्विनास्वेनैवासाध्यन्नभव तितेदन्नथेत्याह॥स्वायत्तंस्वाधी
नंस्वेनैवसाध्यमितियावत।स्वाधीनमपिकिंचिदुःसम्पादंनेदंतथेत्याह।सुसाध्यमिति।स्वायत्तंसुसाधमपुपयोगकाले किंचिदौषधं
सुखदंनभवति।नेदन्तथेत्याहस्वादिति।एवम्विधमपिकिंचिदौषधमनैकान्तिकफलत्वेदंतथेत्याह निश्चितमिति।फलनतो निर्णीतमित्यर्थ
: अभिमतमिष्टंवस्तुनिरामयः पश्चात्तापरहितइत्यर्थः वाह्यप्रसरंमनसोवाह्यविषयेषुसञ्चारस्तुकतात्यजतादृष्टविषयत्यागेष्टो

स्वायत्तमेकांतहितंस्वेप्सितत्यागवेदनं यस्यदुष्करतांयातंधिक्तंपुत्रपकीटकं शास्त्रसंगमतीक्ष्णेनचितातप्तमतापि
ना छिधिवमायसेनाथोमनसैवसुनेनमः ॥ ॥

स्याहजननायतमकुर्वाणांनिंदति।स्वायत्तमिति एकान्तहितंनियमेनहितं कदाचिदप्यहितन्नभवतीत्यर्थः।स्वेप्सितत्याग
:।स्वेष्टविषयत्यागः।स एववेदनंवेदनोपायत्वात।इष्टवस्तुत्यगोनाममनोजयोपायश्चेन्नर्हितस्यागस्यकउपायइत्यतआ
ह।शास्त्रेति।शास्त्रसंगमोऽध्यात्मशास्त्रश्रवणादियद्वासंगमःसाधुसंगमतिः।यथालोहकारोऽग्नितप्तमयस्तद्विपरीतेन
शस्त्रघर्षणपार्षणादिस्तसंगमेणधारेणछेदनदक्षेणअथसाछिनत्तितद्वद्योगकेमचिताभिस्तप्तंअविवेकिमनोऽतापिनावि
तामिरसंकुचेनविवेकशालिमनसाछिधि॥ ॥

मनोनिग्रहं विनाऽपि पुरुषार्थप्राप्तिमात्रं क्वाह। स्वेत्ति। स्वेप्सिततत्यागसाध्यत्वाडुपचारा स्वेप्सिततत्यागरूपिणा कासौ शुभागतिरित्यत आ
हासर्वमिति। संकल्पनं शोभनं सोभनाध्यासलक्षणां तदभावो संकल्पनं तरूद्वशस्त्रं तेन। शंकल्पशद्वितशोभनाशोभनाध्यासाभ्यां
हिरागद्वेषावुत्पद्येते। तत्सागेतयोरसुदयाद्वितं जितमेव भवतीत्यसंकल्पनमेव सस्त्रमित्युक्तं। मनोनिग्रहं किना शुभगतेरभा
वो तदर्थं तन्निग्रहः कार्य इत्याह॥ तामहापदवीमित्यादिश्लोकत्रयेण महापदवीति ब्रह्मोच्यते। सोहि महापदवी यस्या मनवा

> स्वपौरुषैकसाध्येन स्वेप्सितत्यागरूपिणा मनःप्रशमात्रेण विना नास्ति शुभा गतिः॥ सर्वं सर्वगतं शांतं ब्रह्म संपद्यते त
> दा असंकल्पनशस्त्रेण छिन्नं चित्तं गतं यदा॥ तामहापदवीमेकाकामध्याधिवसंस्थिरं चित्तं चिद्भक्तितं कृत्वा चित्तादपि परो
> भव॥ भवभावनया मुक्तो युक्तः परमया धिया। धारयात्मानमव्यग्रो ग्रस्तचित्तं ततः परं। परं पौरुषमाश्रित्य नीत्वा चित्तमचित्त
> तां। तामहापदवीमेहि यत्र नास्ति न चेतरत्॥ ॥

नीवा युगपदेवासमन्तावस्थं संवरति कामयत्तकां मित्यर्थः। अधिवस अधितिष्ठ वसन तस्यां मनो धारयन्नित्यर्थः। चिद्रूक्तितं चि
त्तायत्तं चिन्मात्रशेषं कृत्वेत्यर्थः। आत्मानम्चित्तं धारयन् ब्रह्मणि ततः परं चित्तं चित्तायत्तं भवति मत्तुष्योहं असुष्यायत्र श्कर्ता भो
क्तेत्यभिमन्यमानस्तां यत्र नास्ति यस्यां पदव्यां न भवसि त्वदितरजगद्वा नास्ति तामद्वितीयां ब्रह्माभिधानमहापदवीमेहि गच्छ॥

अद्यापि मनोजयो न सिद्ध इति क्षोभस्य तज्जयविघातकत्वात् स न कर्तव्यो मनोजये प्रवृत्तेनेत्याह अनुद्वेग इति॥ तथोक्तं भगवता
मनिश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसेति। येन मनोजयेन त्रिलोकीविजयस्तृणं त्रैलोक्यविजयोऽपि तृणवत्प्रतिभातीत्यर्थः॥
र्थः॥ पुनरपि मनोनिग्रहोपायमाह। ध्यायत इति हृदयाकाशेऽन्तःकरणे हृत्तनाभावाभावयोः संधेश्च साक्षितया प्रतीयमानायाः वि
दा

अनुद्वेगः श्रियां मूलमनुद्वेगात्प्रवर्तते जंतोर्मनोजयो येन त्रिलोकीविजयस्तृणं॥ ध्यायतो हृदयाकाशे चिति चिच्चक्र
धारया॥ मनो मारय निःशंकं ततो बध्नंति नापदः॥ यदिदं रम्यमरम्यं वा त्वया संविदितं विदा छिन्नाभ्रमंडलं व्योम यथा न्ये
व तदंगानि चिन्नस्येति मतिर्मम॥ अहं सोऽयमिदं तन्मे एतावन्मात्रकं मनः। तदभावनमात्रेण दात्रेणेव विलीयते॥ छिन्ना
भ्रमंडलं व्योम यथा शरदि धूयते॥ वातेनाकल्पनेनैव तथांतर्धूयते मनः॥ कल्पांतपवना वांतु यांतु चैकत्वमर्णवाः॥ तपंतु
द्वादशादित्या नास्ति निर्मनसः क्षतिः॥ ॥

तिविषयेभ्यो ध्यानतः प्रवृत्तया चिच्चक्रधारया ज्ञानचक्रधारया॥ ननु चित्तस्य स्वभावतो बाह्यप्रवणत्वात् ध्यानमेव न संभ
वतीत्यत आह। यदीति विदा विवेकिना त्वया रम्यं रमणीयत्वं स्व अरम्यत्वे रमणीयत्वाभावं यत् संविदितं यदि रमणीयताबु
द्धिरहितं अरमणीयतया विज्ञातं यदीत्यर्थः॥ नन्वहिरागस्य मूलस्य विषयेषु रमणीयताभ्यासस्य निवृत्त्या रागनिवृत्तेः चित्तस्यांगानि
इत्यमः छिन्नान्येव भवंति॥ ॥

मो॰टी॰
७६
76

